आनन्दिताः सन्तः अपि स्वभूमिकानिर्वाहे विफलताहेतोः दुःखिताः अभवन् । शिल्पिनां जीवनरक्षणाय सः मन्दिरशिखरतः समुद्रं प्रति लम्फप्रदानम् अकरोत्, जीवनम्, अत्यजत् च । मृतोऽपि सः अमरः। यावत् कोणार्कः स्थास्यति तावत् धर्मपदनाम जनाः गास्यन्ति । अतः उक्तम् कीर्तिर्यस्यि स जीवति ।



## अवधेयम् (ମନେରଖ)



१.

| | | | | | |
|---|---|---|---|---|---|
| सः/ सा | आसीत् | त्वम् | आसीः | अहम् | आसम् |
| तौ / ते | आस्ताम् | युवाम् | आस्तम् | आवाम् | आस्व |
| ते / ताः | आसन् | यूयम् | आस्त | वयम् | आस्म |

बालकः / बालिका →
- अगच्छत्
- अचिन्तयत्
- आदिशत्
- अददात्
- अकरोत्

बालकौ / बालिके →
- आगच्छताम्
- अचिन्तयताम्
- आदिशताम्
- अदत्ताम्
- अकुरुताम्

बालकाः/बालिकाः →
- अगच्छन्
- अचिन्तयन्
- आदिशन्
- अददुः
- अकुर्वन्



https://withteachers.in/

| | |
|---|---|
| त्वम् | अगच्छः<br>अचिन्तयः<br>आदिशः<br>अददाः<br>अकरोः |
| युवाम् | अगच्छतम्<br>अचिन्तयतम्<br>आदिशतम्<br>अदत्तम्<br>अकुरुतम् |
| यूयम् | अगच्छत<br>अचिन्तयत<br>आदिशत<br>अदत्त<br>अकुरुत |
| अहम् | अगच्छम्<br>अचिन्तयम्<br>आदिशम्<br>अददाम्<br>अकरवम् |
| आवाम् | अगच्छाव<br>अचिन्तयाव<br>आदिशाव<br>अदद्व<br>अकुर्व |
| वयम् | अगच्छाम<br>अचिन्तयाम<br>आदिशाम<br>अदद्म<br>अकुर्म |



https://withteachers.in/



## अभ्यास: (ଅଭ୍ୟାସ)



**१. निजभाषया अनुवांद करोतु । (ନିଜଭାଷାରେ ଅନୁବାଦ କର)**

(क) गङ्गवंशस्य तृतीय: नृपति: नरसिंहदेव: आसीत् ।

(ख) स: भ्रमणार्थं चन्द्रभागाकूलम् अगच्छत् ।

(ग) सर्वेषां शिल्पिनां शिरश्छेदनं भविष्यति ।

**२. शून्यस्थानानि पूरयतु । (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)**

(क) नरसिंहदेव: मन्दिरनिर्माणार्थम् ....... । (अपतत्, अभवत्, अचिन्तयत्)

(ख) धर्मपद: आत्मन: परिचयम् ......। (अददात्, अचिन्तयत्, अगच्छत्)

**३. स्तम्भमेलनं करोतु – ସ୍ତମ୍ଭ ମିଳନ କର ।**

| | |
|---|---|
| यथा आत्मन: → | अभवन् |
| कलाकुशल: | → परिचयम् |
| असमर्थ: | आसीत् |
| जीवनम् | आदिशत् |
| नृप: | नूनम् |
| मरणं | अत्यजत् |



## गृहकार्यम् (ଗୃହକାର୍ଯ୍ୟ)

**१. कीर्त्ति: यस्य स जीवति इति विषयत: अतीतकालस्य दश क्रियापदानि संगृह्य उत्तरपुस्तिकायां लिखतु ।**

**२. उदाहरणानुसारं धातुरूपं व्यवहरतु ।**

यथा – सर्वे दु:खेन (चिन्त्‌धातु:) – अचिन्तयन्

(क) सम: पराक्रमी (अस् धातु) – .................

(ख) दुष्ट: कुकार्यम् (त्यज्‌धातु:) – .................



https://withteachers.in/

(ग) बालकाः विद्यालयम् (गम् धातुः) .................

(घ) गतदिवसे वृष्टिः (भूधातुः) .................

(ङ) सः आत्मनः परिचयम् (दा धातुः) .................

## ३. वयम् अर्थान जानीमः ଆମେ ଜାଣିବା

| | | |
|---|---|---|
| अभवत् | – | ଥିଲା |
| आसीत् | – | ଥିଲା |
| अगच्छत् | – | ଗଲା |
| अचिन्तयत् | – | ଚିନ୍ତା କଲା |
| आदिशत् | – | ଆଦେଶ ଦେଲେ |
| अभवन् | – | ହେଲେ |
| नियोजिताः | – | ନିଯୁକ୍ତ ହେଲେ |
| अददात् | – | ଦେଲା |
| अकथयन् | – | କହିଲେ |
| अस्थापयत् | – | ରଖିଲା |
| अकरोत् | – | କଲା |
| अत्यजत् | – | ତ୍ୟାଗ କଲା |
| गास्यन्ति | – | ଗାନ କରିବେ |
| जीवति | – | ବଞ୍ଚିରହେ । |



https://withteachers.in/

# पञ्चदश: पाठ:

## (ପଞ୍ଚଦଶ ପାଠ)

**'स्म – प्रयोग:'**

**(ବର୍ତ୍ତମାନକାଳ କ୍ରିୟାରେ 'ସ୍ମ' ଯୋଗ କଲେ ଅତୀତକାଳକୁ ବୁଝାଏ)**



### सम्भाषणम्

शिक्षक: – भो छात्रा: ! अद्य किं पठितुम् इच्छन्ति ?

छात्रा: – श्रीमन् ! अद्य वयं विवेकानन्दविषये ज्ञातुम् इच्छाम: ।

शिक्षक: – उत्तमम् । विवेकानन्दस्य बाल्यकालविषये जानन्ति वा ?

मानस: – न, विवेकानन्द: बाल्ये कीदृश: आसीत् ? स: किं किं करोति स्म ?

शिक्षक: – विवेकानन्द: बाल्ये साहसी आसीत् । स: मित्रै: सह क्रीड़ति स्म । प्रतिदिनं देवालयं गच्छति स्म । धर्मविषये गुरुजनान् पृच्छति स्म ।



https://withteachers.in/

लता – सः अन्यत् किं करोति स्म ?

शिक्षकः – विवेकानन्दः जनसेवां करोति स्म । सः प्रतिदिनं शाकान्नं खादति स्म ।

उमेशः – श्रीमन् । मम माता वदति स्म यत् विवेकानन्दः दक्षिणेश्वरमन्दिरं गच्छति स्म ।

शिक्षकः – आम् । स प्रतिदिनं दक्षिणेश्वरमन्दिरं गच्छति स्म। रामकृष्णदेवं गुरुरूपेण पूजयति स्म ।

गीता – तस्य विषये अन्यः कोऽपि विशेषः ?

शिक्षकः – सः सर्वदा संहतिम् इच्छति स्म। तस्य प्रभावेण युवकाः संघटिताः भवन्ति स्म । तस्य बाल्यनाम नरेन्द्रः भवति स्म । कालान्तरे सः विश्वविख्यातः भवति स्म । सः देशे विदेशे भ्रमति स्म । भारतीयसंस्कृतिम् उपदिशति स्म ।

**अस्तु, अद्य पर्याप्तम् । श्वः पुनः नूतनं विषयं ज्ञास्यामः ।**



## अभ्यासः (ଅଭ୍ୟାସ)



**१. एकपदेन निजभाषया उत्तरं लिखतु – ଏକପଦରେ ନିଜଭାଷାରେ ଉତ୍ତର ଲେଖ ।**

(क) विवेकानन्दः बाल्ये कीदृशः आसीत् ?

(ख) विवेकानन्दः कं गुरुरूपेण स्वीकरोति स्म ?

(ग) विवेकानन्दस्य बाल्यनाम किं भवति स्म ?

**२. उचितपदेन शून्यस्थानं पूरयतु – (ଶୁଦ୍ଧପଦରେ ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର ।)**

(क) विवेकानन्दः जनसेवां ................ ।

(ख) धर्मविषये गुरुजनान् ................ ।

(ग) सः प्रतिदनिं दक्षिणेश्वर–मन्दिरं ................ ।

(पृच्छति स्म, करोति स्म, गच्छति स्म)



https://withteachers.in/

## ३. स्तम्भमेलनं करोतु – (ସ୍ତମ୍ଭମିଳନ କର)

| ‘क’ स्तम्भः | ‘ख’ स्तम्भः |
|---|---|
| माता | गच्छति स्म |
| दक्षिणेश्वरं | खादति स्म |
| शाकान्नं | वदति स्म |
| विश्वविख्यातः | इच्छति स्म |
| संहतिम् | भवति स्म |

**गृहकार्यम् (ଗୃହକାର୍ଯ୍ୟ)–**

1. सम्भाषणम् इति विषयतः ‘स्म’ प्रयोगस्य दश क्रियापदानि संगृह्य उत्तरपुस्तिकायां लिखत ।
2. उदाहरणानुसारं ‘स्म’ प्रयोगं करोतु ।

**यथा –** रामः गृहं (गम् – गच्छति स्म)

(क) वानरः वृक्षे (स्था धातु)
(ख) रमेशः पुस्तकं (पठ्)
(ग) लतिका पुष्पाणि (नी)
(घ) त्वं मातरं (पूज्धातुः)
(ङ) अहं गृह कार्यं (कृ–धातु)

**शब्दार्थाः** अद्य – ଆଜି, किम् – କ'ଣ, श्रीमन् – ମହାଶୟ, ज्ञातुम् – ଜାଣିବାକୁ, उत्तमम् – ଭଲ, करोति स्म – କରୁଥିଲେ, आसीत् – ଥିଲେ, क्रीड़ति स्म – ଖେଳୁଥିଲେ, स्वीकरोति स्म – ଗ୍ରହଣ କରିଥିଲେ, कोऽपि – କିଛି, କେହିହେଲେ ମଧ୍ୟ, तस्य – ତାଙ୍କର, पर्याप्तम् – ଯଥେଷ୍ଟ, पुनः – ପୁଣି, संहतिम् – ଏକତା, ज्ञास्यामः – ଜାଣିବା ।



https://withteachers.in/

# षोड़शः पाठः

## (ଷୋଡ଼ଶ ପାଠ)

## कर्तव्यं पालयेत्

### विधिलिङ्लकारः
### (ବିଧିଲିଙ୍ଲକାର)



माता पुत्रं माधवं वदति – पुत्र ! आकाशं पश्य । आकाशः मेधाच्छन्नः अस्ति । प्रायतः वृष्टिः भवेत् । त्वम् अग्रजं रमेशं वद । सः सत्वरं प्रान्तरं गच्छेत् । तत्र धेनुः अस्ति । तां यथाशीघ्रं गृहम् आनयेत् । गोशालायां तस्याः बन्धनं कुर्यात् । धेनुं कदाचित् मक्षिकाः दशेयुः । तासां निवारणं कुर्यात् । माता पुनः वदति, पुत्र ! मम वचनं शृणु । त्वम् आपणं गत्वा द्रव्याणि आनयेः । गमनकाले छत्रं नयेः । नोचेत् सिक्तः स्याः । वृष्टिजलेन मार्गः पूर्णः स्यात् । पवनकारणतः भग्नाः वृक्षाः मार्गे पतेयुः । ते मार्गस्य अवरोधं कुर्युः । त्वम् अपि मार्गे पतेः । वृष्टिसमये वज्रपातः अपि भवेत् । त्वं सर्वत्र दृष्टिं दद्याः । अतः शीघ्रं द्रव्याणि आनीय आगच्छेः ।

मातुः वचनेन माधवः शीघ्रम् आपणं गतवान्, द्रव्याणि आनीतवान् च । तस्य अग्रजः रमेशः अपि धेनुम् आनीय गोशालायां स्थापितवान् ।

अतः उपयुक्तसमये सर्वं कार्यं कुर्यात्, कर्त्तव्यं पालयेत् च । शास्त्रेऽपि उक्तम् अस्ति –

दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत् ।
शास्त्रपूतं वदेद् वाक्यं मनःपूतं समाचरेत् ।।



https://withteachers.in/

## अवधेयम् (ମନେରଖ)

१.

| | | | | | |
|---|---|---|---|---|---|
| सः /सा | भवेत् | त्वं | भवेः | अहं | भवेयम् |
| तौ / ते | भवेताम् | युवां | भवतम् | आवां | भवेव |
| ते /ताः | भवेयुः | यूयं | भवत | वयं | भवेम |

२.

बालकः / बालिका → गच्छेत्, कुर्यात्, पतेत्, वदेत्, पिबेत्

बालकौ / बालिके → गच्छेताम्, कुर्याताम्, पतेताम्, वदेताम्, पिबेताम्

बालकाः / बालिकाः → गच्छेयुः, कुर्युः, पतेयुः, वदेयुः, पिबेयुः

त्वं → गच्छेः, कुर्याः, पतेः, वदेः, पिबेः



https://withteachers.in/

युवां → गच्छेतम्, कुर्यातम्, पतेतम्, वदेतम्, पिबेतम्

यूयं → गच्छेत, कुर्यात, पतेत, वदेत, पिबेत

अहं → गच्छेयम्, कुर्याम्, पतेयम्, वदेयम्, पिबेयम्

आवां → गच्छेव, कुर्याव, पतेव, वदेव, पिबेव

वयं → गच्छेम, कुर्याम, पतेम, वदेम, पिबेम



https://withteachers.in/



## अभ्यासः (ଅଭ୍ୟାସ)



**१. निजभाषया अनुवादं करोतु । (ନିଜଭାଷାରେ ଅନୁବାଦ କର)**

(क) धेनुं यथाशीघ्रं गृहम् आनयेत् ।

(ख) भग्नाः वृक्षाः मार्गे पतेयुः ।

(ग) शास्त्रपूतं वाक्यं वदेत् ।

**२. शून्यस्थानानि पूरयतु । (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)**

(क) त्वं गमनकाले छत्रं ........... । (नयेः, नयानि, नयन्तु)

(ख) वृष्टिजलेन मार्गः पूर्णः ........... । (स्याताम्, स्यात्, स्याम्)

(ग) ........... जलं पिबेत् । (वस्त्रपूतम्, शास्त्रपूतम्, दृष्टिपूतम्)

**३. स्तम्भमेलनं करोतु - ସ୍ତମ୍ଭ ମିଳନ କର**

**यथा - वाक्यं वदेत्**

| | | |
|---|---|---|
| (क) | सिक्तः | पश्य |
| (ख) | आकाशं | पिबेत् |
| (ग) | मक्षिकाः | स्यात् |
| (घ) | जलं | शृणु |
| (ङ) | वचनं | दशेयुः |



## गृहकार्यम् (ଗୃହକାର୍ଯ୍ୟ)

**१. "कर्त्तव्यं पालयेत् इति विषयतः उचित-सम्भावनार्थकानि दश क्रियापदानि संगृह्य उत्तरपुस्तिकायां लिखतु -**

**२. उदाहरणानुसारं क्रियारूपं व्यवहरतु ।**

यथा – अद्य वृष्टिः (भू) = भवेत्

(क) सः सत्वरं गृहं (गम्) = ...........



https://withteachers.in/

(ख) त्वं पुस्तकं (नी) = ...............

(ग) घट: जलेन पूर्ण: (अस्) = ...............

(घ) फलानि वृक्षात् (पत्)= ...............

(ङ) त्वम् असत्यं न (वद्)= ...............

## ३. वयम् अर्थान् जानीम: ଆମେ ଅର୍ଥ ଜାଣିବା।

| | | | | | |
|---|---|---|---|---|---|
| पश्य | – | ଦେଖ | पतेयु: | – | ପଡ଼ିଥାଇ ପାରନ୍ତି |
| अस्ति | – | ହୋଇଅଛି | कुर्यु: | – | କରିପାରନ୍ତି |
| भवेत् | – | ହୋଇପାରେ | पते: | – | ପଡ଼ିପାର |
| गच्छेत् | – | ଯିବା ଉଚିତ | दद्या: | – | ଦେବା ଉଚିତ |
| आनयेत् | – | ଆଣିବା ଉଚିତ | आगच्छे: | – | ଆସିବା ଉଚିତ |
| कुर्यात् | – | କରିବା ଉଚିତ | पालयेत् | – | ପାଳନ କରିବା ଉଚିତ |
| शृणु | – | ଶୁଣ | न्यसेत् | – | ରଖିବା ଉଚିତ |
| आनये: | – | ଆଣିବା ଉଚିତ | पिबेत् | – | ପିଇବା ଉଚିତ |
| नये: | – | ନେବା ଉଚିତ | वदेत् | – | କହିବା ଉଚିତ |
| सिक्त: | – | ଓଦା | समाचरेत् | – | ଆଚରଣ କରିବା ଉଚିତ |
| स्या: | – | ହୋଇପାରୁ | | | |

## ३. वयम् अर्थान् जानीम: ଆମେ ଜାଣିବା।

अहं पठेयम् आवां पठेव
वयं पठेम शास्त्रम् ।
त्वमेव पठे: युवां पठेतम्
यूयं पठेत नित्यम् ।।
पठेद् बालक: पठेतां छात्रौ
पठेयु: सर्वे जना: ।।
जानीयु: सत्यं शृणुयु: गीतां
भवेयु: नूनं धन्या: ।



https://withteachers.in/

**वेदवचनम् –**

पश्येम शरदः शतम्
जीवेम शरदः शतम्
शृणुयाम शरदः शतम् ।

## गीतासूक्तिः

१. दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ।।

२. तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ।।

३. विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्ड़िताः समदर्शिनः ।

४. कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्माते सङ्गोऽस्त्वकर्मणि ।।

५. कोधाद् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ।।

६. श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ।।

७. सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ।।

**स्वास्थ्यरक्षणाय नियमाः**

ब्राह्मे मुहूर्त्ते उत्तिष्ठेत् स्वस्थो रक्षार्थमायुषः ।
सर्वमेव परित्यज्य शरीरमनु पालयेत् ।।
भोजनान्ते पिबेत् तक्रं वासरान्ते पिबेत् पयः ।
निशान्ते च पिबेत् वारि त्रिभी रोगो न जायते ।।



https://withteachers.in/

# सप्तदशः पाठः

## (ସପ୍ତଦଶ ପାଠ)

## सुनागरिकः (ସୁନାଗରିକ)

### लोट् - लकार प्रयोग विधिः
### (ଲୋଟ-ଲକାର ପ୍ରୟୋଗ ବିଧି)



श्रीधरनामा बालकः गुरुकुले पठति । तस्य मित्रं गिरिधरः अपि तत्र तिष्ठति । विभिन्नेषु विषयेषु तयोः प्रत्यहं वार्तालापः चलति।

प्रसङ्गक्रमेण श्रीधरः गुरुदेवात् सुनागरिकताविषये यत् ज्ञानं लब्धवान् तदेव कथयति । गिरिधरोऽपि साग्रहं शृणोति ।

श्रीधरः कथयति, शृणु मित्र गुरुदेवः कथितवान् – सर्वे छात्राः सुनगरिकाः भवन्तु । अहं तस्य वचनं पालयानि । त्वमपि पालय ।

अहं सुनागरिकरूपेण समाजे सुपरिचितः भवानि । त्वमपि तथा भव । तस्य वचनानुसारं प्रत्यहं सूर्य्योदयात् प्राक् शय्यां त्यज । भगवत्स्मरणं कुरु । अतः परं शौचकर्माणि योगाभ्यासं स्नानं च कुरु । यःकः अपि सुनागरिकःभवितुम् इच्छति सः अपि नियमान् पालयतु, शुद्धवस्त्रं धारयतु देवार्चनं करोतु, गुरुजनान् मानयतु, तेषां वचनानि शृणोतु, अवधारयतु च । सर्वे उत्तमं खाद्यं भक्षयन्तु, दरिद्रान् भोजयन्तु च । विपदि धैर्य्यधारणं कुर्वन्तु, परिजनान् अपि कुशलानि पृच्छन्तु । वृक्षान् रोपयन्तु, परिवेशसुरक्षां च विदधतु । भारतीयज्ञानपरम्परां विदन्तु । वयं सर्वे पापकार्य्यं प्रति भयाम, पुण्यकार्य्यं करवाम, परस्परं हितं चिन्तयाम, देशसेवां च करवाम । सर्वेषां कल्याणं चिन्तयाम । शास्त्रे उक्तम् –

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ।।**



https://withteachers.in/



## अवधेयम् (ମନେରଖ)



१.

| | | |
|---|---|---|
| सः /सा – करोतु | त्वं – कुरु | अहं – करवाणि |
| तौ / ते – कुरुताम् | युवां – कुरुतम् | आवां – करवाव |
| ते /ताः – कुर्वन्तु | यूयं – कुरुत | वयं – करवाम |

बालकः / बालिका
सः / सा /भवान् / भवती
→ भवतु, रोपयतु, अस्तु, चिन्तयतु, पश्यतु

बालकौ / बालिके
तौ /ते /भवन्तौ / भवत्यौ
→ भवताम्, रोपयताम्, स्ताम्, चिन्तयताम्, पश्यताम्

बालकाः / बालिकाः
ते/ ताः / भवन्तः / भवत्यः
→ भवन्तु, रोपयन्तु, सन्तु, चिन्तयन्तु, पश्यन्तु

त्वं
→ भव, रोपय, एधि, चिन्तय, पश्य



https://withteachers.in/

२.

- युवां → भवतम्, रोपयतम्, स्तम्, चिन्तयतम्, पश्यतम्
- यूयं → भवत, रोपयत, स्त, चिन्तयत, पश्यत
- अहं → भवानि, रोपयानि, असानि, चिन्तयानि, पश्यानि
- आवां → भवाव, रोपयाव, असाताव, चिन्तयाव, पश्याव
- वयं → भवाम, रोपयाम, असाम, चिन्तयाम, पश्याम



## अभ्यास: (ଅଭ୍ୟାସ)



१. **निजभाषया अनुवादं करोतु । (ନିଜଭାଷାରେ ଅନୁବାଦ କର)**

(क) त्वमपि सुनागरिक: भव ।

(ख) भवान् गुरुजनान् मानयतु ।

(ग) छात्र: नियमान् पालयतु ।



https://withteachers.in/

**२. शून्यस्थानानि पूरयतु । (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)**

(क) वयं सुनागरिका: ............. । (भवानि, भवाव, भवाम)

(ख) त्वं सूर्योदयात् प्राक् शय्यां ............. । (त्यज, त्यजतम्, त्यजत)

(ग) भवन्त: वृक्षान् ............. । (रोपयन्तु, रोपयतु, रोपयताम्)

**३. स्तम्भ मेलनं करोतु – (ଉଭୟ ସ୍ତମ୍ଭକୁ ମିଳାଇ ଲେଖ)**

| | |
|---|---|
| यथा–गुरुजनान् | मानयतु |
| (क) भवान् | रोपयन्तु |
| (ख) वृक्षान् | पश्यन्तु |
| (ग) वयं | कुरु |
| (घ) भद्राणि | बिभयाम |
| (ङ) त्वं | तिष्ठतु |



## गृहकार्यम् (ଗୃହକାର୍ଯ୍ୟ)

**१. 'सुनागरिक' विषयत: आदेशार्थकानि दशक्रिया पदानि संगृह्य उत्तरपुस्तिकायां लिखतु ।**

**२. उदाहरणानुसारं धातुरूपं व्यवहरतु ।**

यथा – त्वम् अपि तथा (भू) = भव

(क) अहं सुपरिचित: (भू) ......

(ख) भवान् देवार्चनं (कृ) ......

(ग) स: गुरुजनान् (मान्) .......

(घ) सर्वे निरामया: (अस्) .........

(ङ) वयं हितं (चिन्त्) .......



https://withteachers.in/

## ३. वयम् अर्थान् जानीमः ଆମେ ଅର୍ଥ ଜାଣିବା

| | | | | | |
|---|---|---|---|---|---|
| वार्त्तालापः | – | କଥାବାର୍ତ୍ତା | मानयतु | – | ମାନୁ / ସମ୍ମାନ କରୁ |
| लब्धवान् | – | ଲାଭ କଲା | शृणोतु | – | ଶୁଣୁ |
| शृणु | – | ଶୁଣ | अवधारयतु | – | ମନେରଖ |
| भवन्तु | – | ହୁଅନ୍ତୁ | भक्षयन्तु | – | ଖାଆନ୍ତୁ |
| पालयानि | – | ପାଳନ କରେ | भोजयन्त | – | ଖାଇବାକୁ ଦିଅନ୍ତୁ / ଖୁଆନ୍ତୁ |
| पालय | – | ପାଳନ କର | कुर्वन्तु | – | କରନ୍ତୁ |
| भवानि | – | ହୁଏ | पृच्छन्तु | – | ପଚାରନ୍ତୁ |
| भव | – | ହୁଅ | रोपयन्तु | – | ଲଗାନ୍ତୁ |
| प्रत्यहम् | – | ପ୍ରତିଦିନ | विदधातु | – | ବିଧାନ କରନ୍ତୁ |
| प्राक् | – | ପୂର୍ବରୁ | विदन्तु | – | ଜାଣନ୍ତୁ |
| त्यज् | – | ତ୍ୟାଗ କର | बिभयाम | – | ଭୟକରୁ |
| कुरू | – | କର | करवाम | – | ଭୟ କରୁ |
| भवितुम् | – | ହେବା ପାଇଁ | चिन्तयाम | – | ଚିନ୍ତାକରୁ |
| पालयतु | – | ପାଳନ କରୁ | सन्तु | – | ହୁଅନ୍ତୁ |
| धारयतु | – | ଧାରଣ କରୁ / ପିନ୍ଧୁ | पश्यन्तु | – | ଦେଖନ୍ତୁ |

## ३. वयम् जानीमः ଆମେ ଜାଣିବା



### लोट्लकारगीतम् (माता पुत्र संलापः)

मातः ! वदानि ? वद त्वं पुत्र !
अहं पठानि ? पठ रे अत्र ।
किं करवाणि ? कुरु सन्ततम्
स्वधर्मकृत्यं देशाय हितम् ।। १ ।।
किं करवाव ? आवां बालकौ
युवां भवतं देशसेवकौ ।
कृषिं करोतु ग्रामे गौतमः
वीरः सैनिकः भवतु भीमः ।। २ ।।
किं करवाम ? बालकाः वयम् ।
कुरुत कर्म त्यजत भयम् ।





https://withteachers.in/



यूयं हि कर्मवीरा: भवत ।

उद्योगशालां सङ्घटयत ।। ३ ।।

एकत्र बाल: बाला पठताम्

भ्राता भगिनी चेति जानीताम्

गुरुदर्शितपथेन याताम्।

सत्यं च प्रियं मितं वदताम् ।। ४ ।।



जाति – वर्ण – धर्मादिविभिन्ना:

भारतीया: तु सर्वे समाना: ।

शान्तिं च मैत्रीं मुदा इच्छन्तु ।

शत्रुत: सर्वे देशं रक्षन्तु ।। ५ ।।






https://withteachers.in/

# अष्टादशः पाठः
(ଅଷ୍ଟାଦଶ ପାଠ)

## वन्दे भारतमातरम्






https://withteachers.in/




| | | | | | |
|---|---|---|---|---|---|
| १. अयोध्या | २. मथुरा | ३. हरिद्वारम् | ४. काशी | ५. काञ्ची | ६. अवन्तिका |
| ७. वैशाली | ८. द्वारिका | ९. पुरी | १०. गया | ११. प्रयागराजः | १२. पाटलीपुत्रम् |
| १३. विजयनगरम् | १४. इन्द्रप्रस्थम् | १५. सोमनाथः | १६. अमृतसरः | १७. अमरनाथः | १८. लामायुरुः |
| १९. वैष्णवदेवी | २०. ज्वालामुखी | २१. केदारनाथः | २२. बद्रीनाथः | २३. ज्योतिर्मठः | २४. कुरुक्षेत्रम् |
| २५. सम्मेतशिखरम् | २६. वैद्यनाथः | २७. नवद्वीपः | २८. कामाख्या | २९. तवाङ्गः | ३०.परशुरामकुण्डम् |
| ३१. सनामहिः | ३२. त्रिपुरसुन्दरी | ३३. भोरमदेवः | ३४. भद्राचलम् | ३५. श्रीशैलम् | ३६. तिरुपतिः |
| ३७. तिरुवन्नामलयः | ३८. श्रीरङ्गम् | ३९. रामेश्वरम् | ४०. कन्याकुमारी | ४१. शबरीमलयः | ४२. शृङ्गेरी |
| ४३. रजतपीठपुरम् | ४४. गोमन्तकम् | ४५. कूडलसंगमः | ४६. पाण्डुरङ्गपुरम् | ४७. भीमशङ्करः | ४८. त्र्यम्बकेश्वरम् |
| ४९. घुश्मेश्वरम् | ५०. ओङ्कारेश्वरम् | ५१. पदलिप्तपुरम् | ५२. नागेश्वरम् | ५३. अर्बुदगिरिः | ५४. अजयमेरुः |

मानचित्रं मापकानुसारं नास्ति।



https://withteachers.in/




एषा अस्माकं वत्सला भारतमाता । साक्षात् पर्वतराजः हिमालयः मुकुटरूपेण अस्याः मस्तके शोभते । अस्याः चरणौ प्रक्षालयति स्वयं रत्नाकरः समुद्रः । भारतभूमौ महेन्द्रः, मलयः, सह्यः, रैवतकः, विन्ध्यः, अरावलिः, इत्यादयः, श्रेष्ठाः पर्वताः विराजन्ते। अत्रैव गङ्गा, यमुना, सरस्वती, सिन्धुः, ब्रह्मपुत्रः, गण्डकी, महानदी, नर्मदा, गोदावरी, कृष्णा, कावेरी इत्यादयः पवित्राः नद्यः प्रवहन्ति । नद्यः अपि अस्माकं मातरः इव ।

अयोध्या, मथुरा, हरिद्वारम्, काशी, काञ्ची, अवन्तिका, वैशाली, द्वारिका, पुरी, गया, प्रयागः, पाटलीपुत्रं, विजयनगरम्, इन्द्रप्रस्थं, सोमनाथः, अमृतसरः इत्यादीनि मङ्गलानि तीर्थक्षेत्राणि नगराणि च भारतभूमौ एव सुशोभन्ते ।



https://withteachers.in/

कृषकबान्धवाः अस्माकं भारतभूमिं सर्वदा स्व – स्वेदबिन्दुभिः सिञ्चन्ति । एतेषां परिश्रमेण एव भारतभूमिः हरितवर्णमयी समृद्धा शस्यश्यामला च सञ्जाता । भारतमातुः समृद्धेः एषा आभा हरितवर्णरूपेण अस्माकं राष्ट्रध्वजे विराजते । **'जयतु कृषकः'** इति वक्तुम् अस्मान् प्रेरयति ध्वजस्थितः एषः हरितवर्णः ।





https://withteachers.in/

अस्माकं राष्ट्रध्वजः त्रिवर्णयुतः । अस्मिन् राष्ट्रध्वजे केशरः, श्वेतः, हरितः, च वर्णाः, विराजन्ते । ध्वजस्य मध्ये सुन्दरं नीलवर्णं चक्रमपि शोभते। ध्वजे विराजमानाः वर्णाः चक्रं च विशिष्टं सन्देशं प्रयच्छन्ति ।



त्रिवर्णध्वजस्य ऊर्ध्वभागे विराजते केशरवर्णः । एष वर्णः त्यागपरम्परायाः शौर्यपरम्परायाः च सूचकः अस्ति । ये भारतमातुः आजीवनं सेवां कृतवन्तः, देशस्य स्वतन्त्रतां प्राप्तुं सहर्षं स्वप्राणान् अर्पितवन्तः च, तेषां वीराणां बलिदानं सूचयति एषः वर्णः । **'जयतु सैनिकः'** इति वक्तुम् अस्मान् प्रेरयति ध्वजस्थितः अयं केशरवर्णः ।





https://withteachers.in/



मध्ये स्थित: श्वेतवर्ण: शान्ते: सत्यस्य च द्योतक: अस्ति । अणुशास्त्रे, सङ्गणकशास्त्रे, चिकित्साशास्त्रे, अन्तरिक्षशास्त्रे, आयुधशास्त्रे इत्यादिषु विज्ञानस्य विभिन्नेषु क्षेत्रेषु भारतीयै: वैज्ञानिकै: महत् यश: प्राप्तम् अस्ति । वैज्ञानिकानां तत् धवलं यश: धवलवर्णरूपेण राष्ट्रध्वजस्य मध्ये विलसति। भारतीयं विज्ञानं शान्तिं प्रगतिं सुरक्षां च परिपोषयति । **'जयतु वैज्ञानिक:'** इति वक्तुम् अस्मान् प्रेरयति ध्वजमध्यस्थ: अयं धवलवर्ण: ।





https://withteachers.in/



ध्वजे विराजमानस्य घननीलवर्णस्य चक्रस्य नाम धर्मचक्रम् इति। अस्मिन् चक्रे चतुर्विंशतिः अराः सन्ति । एतत् चक्रं चलनीयं कर्तव्यपथे वै, न विरम, सततं चल इति भावं बोधयति । सूर्यः विरामं विना नित्यं सञ्चरति । नदी कष्टानि सहमाना अपि ध्येयं प्रति नित्यं प्रवहति । इदं चक्रं जीवने श्रान्तेः आलस्यस्य प्रमादस्य च स्थानं न भवतु इति सन्देशं प्रयच्छति ।

वयं सर्वेऽपि धन्याः यत् अस्यां पवित्रभूम्यां जन्म प्राप्तवन्तः। वयं पवित्रायाः भारतमातुः नित्यं वन्दनं कुर्मः अस्याः गौरववर्धनार्थं च प्रयत्नं कुर्मः । आगच्छन्तु मिलित्वा सर्वे गायामः –

**वयं बालका भारतभक्ताः**
**वयं बालिका भारतभक्ताः ।**
**वयं हि सर्वे भारतभक्ताः**
**पृथ्वीं स्वर्गं जेतुं शक्ताः ।।**





https://withteachers.in/

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषायाम् अर्थः |
|---|---|---|---|---|
| वन्दे | प्रणामं करोमि | प्रणाम करता/ती हुँ | I greet | ପ୍ରଣାମ କରୁଛି |
| आलिङ्ग्य | आलिङ्गनं कृत्वा | आलिंगन कर के | Having embraced | ଆଲିଙ୍ଗନ କରି |
| बहुत्र | बहुषु स्थानेषु | अनेक स्थानों पर | In many places | ବହୁ ସ୍ଥାନରେ |
| शृणुमः | श्रवणं कुर्मः | हम सुनते हैं | We listen | ଶୁଣୁଛୁ |
| जिज्ञासा | ज्ञातुम् इच्छा | जानने की इच्छा | Curiosity | ଜାଣିବାର ଇଚ୍ଛା |
| उपन्यासम् | बृहत्कथारूपम् | उपन्यास को | Novel | ଉପନ୍ୟାସକୁ |
| रम्यम् | सुन्दरम् | रमणीय | Pleasant | ସୁନ୍ଦର |
| आन्दोलने | क्रान्तौ | आन्दोलन में | In the movement | ଆନ୍ଦୋଳନରେ |
| वत्सला | स्नेहयुक्ता | स्नेहमयी | Loving | ସ୍ନେହମୟୀ |
| माहात्म्यम् | महत्त्वम् | महिमा | Greatness | ମହିମା |
| मुकुटरूपेण | किरीटरूपेण | मुकुट रूप से | As a crown | ମୁକୁଟ ପରି |
| पर्वतराजः | पर्वतानां राजा | पर्वतों का राजा | The king of mountains | ପର୍ବତଶ୍ରେଷ୍ଠ |
| रत्नाकरः | समुद्रः | सागर | Sea/Ocean | ସମୁଦ୍ର |
| तीर्थक्षेत्राणि | पुण्यक्षेत्राणि | तीर्थस्थल | Holy places | ତୀର୍ଥକ୍ଷେତ୍ରଗୁଡ଼ିକ |
| विराजमानः | शोभायमानः | सुशोभित होता हुआ | Shining | ଶୋଭାପାଉଥିବା |
| सूचकः | बोधकः | सूचित करने वाला | Indicator | ସୂଚନା ଦେଉଥିବା |
| केशरवर्णः | केसरवर्णः | केसरिया रंग | Saffron colour | କେଶରୀ/ଗୈରିକ ରଙ୍ଗ |
| प्राप्तुम् | लब्धुम् | पाने के लिए | To get | ପାଇବାକୁ |
| वक्तुम् | भाषितुम् | बोलने के लिए | To speak | କହିବାକୁ |
| कृषक – बान्धवाः | कृषीवल – बान्धवाः | किसान भाई | Our dear farmers | କୃଷକ ବନ୍ଧୁମାନେ |
| स्वेदबिन्दुभिः | घर्मस्य जलकणैः | पसीने की बुँद से | By sweat - drops | ଝାଳକଣାଗୁଡ଼ିକଦ୍ୱାରା |
| सिञ्चन्ति | सिञ्चनं कुर्वन्ति | सींचते हैं | Sprinkle | ସିଞ୍ଚନ କରୁଛନ୍ତି |
| शस्यश्यामला | शस्यैः घनश्यामा | उपजों से हरी – भरी | Densely covered with flora | ଶସ୍ୟ/ଶସ୍ୟଶ୍ୟାମଳ |
| आभा | कान्तिः | चमकः | Lustre | କାନ୍ତି |



https://withteachers.in/

| शब्दः | अर्थः | हिन्दी | English | मातृभाषायाम् अर्थः |
|---|---|---|---|---|
| अणुशास्त्रे | परमाणुशास्त्रे | परमाणु विज्ञान में | In atomic science | ପରମାଣୁ ବିଜ୍ଞାନରେ |
| आयुधशास्त्रे | शास्त्रविज्ञाने | शस्त्रास्त्र विज्ञान में | In science of weapons | ଅସ୍ତ୍ରଶସ୍ତ୍ରବିଜ୍ଞାନରେ |
| धवलम् | शुक्लम् | श्वेत | White | ଧଳା |
| घननीलवर्णस्य | गाढनीलवर्णस्य | गहरे नीले रंग का | Of navy - blue colour | ଘନନୀଳବର୍ଣ୍ଣର |
| अराः | चक्रस्य यष्टिकाः | तीलियाँ | Spokes of wheel | ଅରଗୁଡ଼ିକ |
| कर्तव्यपथे | कर्तव्यस्य मार्गे | कर्तव्य मार्ग पर | On the path of duty | କର୍ତ୍ତବ୍ୟ ପଥରେ |
| सहमाना | सहनं कुर्वती | सहती हुई | Bearing | ସହୁଥିବା |
| श्रान्तेः | क्लान्तेः | थकान का | Of tiredness | କ୍ଳାନ୍ତିର |
| प्रमादस्य | अनवधानतायाः | असावधानता का | Of carelessness | ଅସାବଧାନତାର |
| जेतुम् | विजयं प्राप्तुम् | जीतने के लिए | To win | ଜୟ କରିବାକୁ |

## वयं जानीमः ଆମେ ଜାଣିବା

### प्राचीन-भौगोलिक-नाम्नाम्-आधुनिक-नामानि नामान्तराणि च

#### प्राचीनानि तीर्थक्षेत्राणि नगराणि च

| | | | |
|---|---|---|---|
| हरिद्वारम् – माया / मायापुरी (ଉତ୍ତରାଖଣ୍ଡ)<br>विजयनगरम्–हम्पे (ଆନ୍ଧ୍ର ପ୍ରଦେଶ)<br>घुश्मेश्वरम् – धुष्णेरावाम्(ମହାରାଷ୍ଟ୍ର)<br>रजतपीठपुरम् – उडुपि / ओड्डुप (କର୍ଣ୍ଣାଟକ) | काशी – वाराणसी (ଉତ୍ତରପ୍ରଦେଶ)<br>पाटलीपुत्रम् – पटना (ବିହାର)<br>गोमन्तकम् – गोवा (ଗୋଆ)<br>अवन्तिका–उज्जैनः (ମଧ୍ୟପ୍ରଦେଶ)<br>पाण्डुरङ्गपुरम् – पण्ढरपुरम् (ମହାରାଷ୍ଟ୍ର) | अर्बुदगिरिः – आबू – पर्वतः / दिलवाडा (ରାଜସ୍ଥାନ)<br>इन्द्रप्रस्थम् – देहली / दिल्ली (ଦିଲ୍ଲୀ)<br>अजयमेरः – अजमेरः, पुष्करं च (ରାଜସ୍ଥାନ) | पदलिप्तपुरम् – पालीताणा / पुण्डरीक – गिरिः / शत्रुञ्जय – गिरिराजः (ଗୁଜରାଟ) |

#### पवित्राः नद्यः

| | | | |
|---|---|---|---|
| **यमुना** – कालिन्दी<br>**सरयूः** – घाघरा<br>**शुतुद्रिः** – शतुद्रुः / सतलुज्<br>**शोणा** – सोन् | **परूष्णी** – रावी<br>**चर्मण्वती** – चम्बल्<br>**रेवा** – नर्मदा<br>**गोदा** – गोदावरी | **तापी** – ताप्ती<br>**वेत्रवती** –वेतवा<br>**वितस्ता** – झेलम्<br>**कौशिकी** – कोसी | **गङ्गा** – जाह्नवी ( भागीरथी /अलकनन्दा)<br>**शारदा** – काली/ महाकाली<br>**गण्डकी** – नारायणी / सदानीरा<br>**चन्द्रभागा** – असिक्नी / चिनाब |

#### श्रेष्ठाः पर्वतमालाः

| | |
|---|---|
| **महेन्द्रगिरिः** – पूर्वी – घाट पर्वतमाला<br>**रैवतकः** – गिरनारः पर्वतमाला<br>**सह्याद्रिः** – पश्चिमी –घाटः पर्वतमाला ( उपरि – भागः ) | **अरावलिः** – अरावली पर्वतमाला<br>**विन्ध्याचलः** – विन्ध्यः पर्वतमाला<br>**मलयाचलः** – पश्चिमी – घाटः पर्वतमाला ( अधः – भागः ) |



https://withteachers.in/



## वयम् अभ्यासं कुर्मः

१. **अधः प्रदत्तानां प्रश्नानाम् उपयुक्तम् उत्तरं बन्धनीमध्यात् चित्वा लिखतु । (ଉପଯୁକ୍ତ ଉତ୍ତର ବନ୍ଧନୀ ମଧ୍ୟରୁ ବାଛି ଲେଖ)**

(क) पर्वतराजः कः ?

(ख) कः भारतमातुः चरणौ प्रक्षालयति ?

(ग) अस्माकं राष्ट्रध्वजः कीदृशः ?

(घ) ध्वजस्थितः केशरवर्णः अस्मान् किं वक्तुं प्रेरयति ?

(ङ) कृषकबान्धवाः भारतभूमिं कैः सिञ्चन्ति ?

(च) केषां धवलं यशः राष्ट्रध्वजस्य मध्ये विलसति ?

(छ) सूर्यः कं विना नित्यं सञ्चरति ?

(जयतु सैनिकः, स्वेदविन्दुभिः, विरामं, वैज्ञानिकानां, समुद्रः, हिमालयः, त्रिवर्णयुतः)

२. **अधः प्रदत्तानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखतु – (ନିମ୍ନଲିଖିତ ପ୍ରଶ୍ନଗୁଡ଼ିକର ଉତ୍ତର ପୂର୍ଣ୍ଣ ବାକ୍ୟରେ ଲେଖ)**

(क) पवित्राः नद्यः काः ?

------------------------------------------------------------

(ख) धर्मचक्रं कं भावं बोधयति ?

------------------------------------------------------------

(ग) कृषकबान्धवानां परिश्रमेण भारतभूमिः कथं सञ्जाता ?

------------------------------------------------------------

(घ) विज्ञानस्य केषु क्षेत्रेषु भारतीयैः यशः प्राप्तम् ?

------------------------------------------------------------

(ङ) अन्ते सर्वे किं गीतं गायन्ति ?

------------------------------------------------------------



https://withteachers.in/

**३. अधः प्रदत्तानां शब्दानाम् उदाहरणानुसारं रिक्तस्थानेषु रूपाणि लिखतु - (ନିମ୍ନଲିଖିତ ଶବ୍ଦଗୁଡ଼ିକର ଉଦାହରଣ ଅନୁସାରେ ଶୂନ୍ୟ ସ୍ଥାନରେ ଶୁଦ୍ଧରୂପ ଲେଖ)**

| | एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|---|
| (क) | चरणम् | चरणौ | ................ | (द्वितीया विभक्तिः) |
| (ख) | नदी | ................ | नद्यः | (प्रथमा विभक्तिः) |
| (ग) | ललाटे | ................ | ललाटेषु | (सप्तमी विभक्तिः) |
| (घ) | देशाय | देशाभ्याम् | ................ | (चतुर्थी विभक्तिः) |
| (ङ) | चक्रम् | ................ | चक्राणि | (प्रथमा विभक्तिः) |
| (च) | वैज्ञानिकेन | ................ | वैज्ञानिकैः | (तृतीया विभक्तिः) |
| (छ) | अहम् | आवाम् | ................ | (प्रथमा विभक्तिः) |
| (ज) | विज्ञानस्य | ................ | विज्ञानानाम् | (षष्ठी विभक्तिः) |

**४. अधः प्रदत्तनि वाक्यानि पठित्वा मातृभाषया - अनुवांद करोतु - (ନିମ୍ନଲିଖିତ ବାକ୍ୟଗୁଡ଼ିକୁ ପଢ଼ି ମାତୃଭାଷାରେ ଅନୁବାଦ କର)**

(क) भारतभूमौ पवित्राः नद्यः प्रवहन्ति ।
(ख) भारतस्य मस्तके हिमालयः मुकुटरूपेण शोभते ।
(ग) भारतभूमौ श्रेष्ठाः पर्वताः विराजन्ते ।
(घ) राष्ट्रध्वजे केशरः, श्वेतः, हरितः च वर्णाः सन्ति ।
(ङ) वयं भारते जन्म प्राप्तवन्तः ।

**५. अधः प्रदत्तानां शब्दानाम् उदाहरणानुसारं विभक्तिं वचनं च लिखतु - (ଉଦାହରଣ ଅନୁଯାୟୀ ପ୍ରଦତ୍ତ ଶବ୍ଦଗୁଡ଼ିକର ବିଭକ୍ତି ଓ ବଚନ ଲେଖ)**

| शब्दः | | विभक्तिः | वचनम् |
|---|---|---|---|
| (क) भारतमाता | - | प्रथमाविभक्तिः | एकवचनम् |
| (ख) नद्यः | - | .................. | .................. |
| (ग) ललाटे | - | .................. | .................. |
| (घ) तीर्थक्षेत्राणाम् | - | .................. | .................. |
| (ङ) देशस्य | - | .................. | .................. |
| (च) बलिदानम् | - | .................. | .................. |
| (छ) कृषकबान्धवाः | - | .................. | .................. |



https://withteachers.in/

(ज) अस्मान् – .................... ....................

(झ) क्षेत्रेषु – .................... ....................

**६. पाठे प्रयुक्तानि क्रियापदानि रिक्तस्थानेषु लिखतु – (ପାଠରେ ଥିବା କ୍ରିୟାପଦଗୁଡ଼ିକୁ ବାଛି ଶୂନ୍ୟସ୍ଥାନରେ ଲେଖ)**

| | | | |
|---|---|---|---|
| शृणुमः | .................... | .................... | .................... |
| .................... | .................... | .................... | .................... |
| .................... | .................... | .................... | .................... |
| .................... | .................... | .................... | .................... |



## गृहकार्यम् –(ଗୃହକାର୍ଯ୍ୟ)

१. जयतु सैनिकः, जयतु कृषकः, जयतु वैज्ञानिकः इति उद्घोषान् बृहत्फलके विलिख्य विद्यालयस्य कक्षायाः च भित्तिषु स्थापयन्तु । एतेषां मातृभाषया अनुवादं च कुर्वन्तु ।

२. ओाडिशाप्रदेशे विद्यमानानां नदीनां पर्वतानां तीर्थक्षेत्राणां च नामानि लिखतु ।

३. विरामदिनेषु मातापितृभ्यां सह कृषिक्षेत्रं गच्छन्तु । तत्र कृषिकार्यं दृष्ट्वा संस्कृतभाषया पञ्चभिः वाक्यैः अस्य वर्णनं कुर्वन्तु अथवा चित्रं रचयन्तु ।

४. दशानां ( १० ) देशभक्तानां नामसहितानि चित्राणि संगृह्य 'A-3' आकारस्य कलापत्रके संश्लेषयन्तु ।



https://withteachers.in/

# नवदशः पाठः

(ଊନବିଂଶ ପାଠ)

# नित्यं पिबामः सुभाषितरसम्

(मानवानां विविधमूल्यानां विकासाय श्रेष्ठजनैः उक्तानि सुवचनानि एव सुभाषितानि)

**वस्त्रेण वपुषा वाचा विद्यया विनयेन च ।**
**वकारैः पञ्चभिर्युक्तो नरो भवति पूजितः ।। १ ।।**

**पदच्छेदः –** वस्त्रेण वपुषा वाचा विद्यया विनयेन च वकारैः पञ्चभिः युक्तः नरः भवति पूजितः ।

**अन्वयः –** वस्त्रेण वपुषा वाचा विद्यया विनयेन च एतैः पञ्चभिः वकारैः युक्तः नरः पूजितः भवति।

**भावार्थः –** यः जनः समुचितानि वस्त्राणि धरति, शरीरेण स्वस्थः अस्ति, सदा सुमधुरं हितकरं च वचनं वदति, सर्वदा अध्ययने संलग्नः भवति, तथा च विनम्रतया च व्यवहरति तादृशः पञ्चभिः वकारैः – अर्थात् वस्त्रं वपुः वाक् विद्या विनयः – इति एतैः सम्मानं प्राप्नोति ।

**ଅର୍ଥ :** ପାଞ୍ଚଟି ବକାର ଯଥା ବସ୍ତ୍ର, ବପୁ (ଶରୀର), ବଚନ, ବିଦ୍ୟା ଏବଂ ବିନୟ ଦ୍ୱାରା ବିଭୂଷିତ ବ୍ୟକ୍ତି ସବୁଠାରୁ ସମ୍ମାନ ପାଏ ?

**षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।**
**निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ।। २ ।।**



**पदच्छेद :** षड् दोषाः पुरुषेण इह हातव्याः भूतिम् इच्छता निद्रा तन्द्रा भयम् क्रोधः आलस्यम् दीर्घसूत्रता।

**अन्वयः –** इह भूतिम् इच्छता पुरुषेण निद्रा तन्द्रा भयं कोधः आलस्यं दीर्घसूत्रता (पतने) षड् दोषाः हातव्याः।

**भावार्थः –** अस्मासु निद्रादयः षड् दोषाः भवन्ति। एते अस्माकम् ऐश्वर्यस्य उन्नतेश्च अवरोधकाः भवन्ति । अतः यदि मानवः स्वजीवने धनिकः, विद्वान् वा भवितुम् इच्छति, एश्वेर्यं वैभवं च प्राप्तुं वाञ्छति तर्हि सः अतिनिद्रां, तन्द्रां, भीतिं, क्रोधम्, आलस्यं, विलम्बेन कार्यकरणस्य प्रवृत्तिं च एतान् षड् दोषान् परित्यजेत् ।



https://withteachers.in/

**ଅର୍ଥ :** ଐଶ୍ୱର୍ଯ୍ୟ ଇଚ୍ଛା କରୁଥିବା ବ୍ୟକ୍ତି ନିଦ୍ରା, ତନ୍ଦ୍ରା (ଘୁମେଇବା, ଶିଥିଳତା) ଭୟ, କ୍ରୋଧ, ଆଳସ୍ୟ ଓ ଦୀର୍ଘସୂତ୍ରତା (କାର୍ଯ୍ୟକୁ ବିଳମ୍ବରେ କରିବା) ପ୍ରଭୃତି ଛଟି ଦୋଷକୁ ତ୍ୟାଗ କରିବା ଉଚିତ ।)

**जलबिन्दुनिपातेन क्रमशः पूर्यते घटः ।**
**स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च ।। ३ ।।**



**पदच्छेदः –** जलबिन्दु – निपातेन क्रमशः पूर्यते घटः सः हेतुः सर्वविद्यानां धर्मस्य च धनस्य च ।

**अन्वयः –** घटः क्रमशः जलबिन्दु – निपातेन पूर्यते, सः हेतुः सर्वविद्यानां धर्मस्य च धनस्य च भवति ।



**भावार्थ :** यथा निरन्तरं जलस्य बिन्दूनां पतनेन रिक्तः अपि घटः पूर्णः भवति तथैव जीवने निरन्तरम् अभ्यासेन सामान्यः अपि मानवः सर्वप्रकारकं ज्ञानं धर्मं, धनं च लभते ।

**ଅର୍ଥ :** ଯେପରି ବିନ୍ଦୁ ବିନ୍ଦୁ ଜଳ ଦ୍ୱାରା କ୍ରମେ ଘଟ ପୂର୍ଣ୍ଣ ହୋଇଥାଏ, ସେହିପରି କ୍ରମଶଃ ଅଭ୍ୟାସଦ୍ୱାରା ମନୁଷ୍ୟ ସମସ୍ତ ବିଦ୍ୟା, ଧର୍ମ ଓ ଧନର ଅଧିକାରୀ ହୁଏ ।

**प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः ।**
**तस्मात् तदेव वक्तव्यं वचने का दरिद्रता ।। ४ ।।**

**पदच्छेद : –** प्रियवाक्य – प्रदानेन सर्वे तुष्यन्ति जन्तवः तस्मात् तत् एव वक्तव्यं वचने का दरिद्रता ।

**अन्वयः –** सर्वे जन्तवः प्रियवाक्यप्रदानेन तुष्यन्ति, तस्मात् तद् एव वक्तव्यं, वचेन का दरिद्रता ?

**भावार्थः –** मधुरभाषणेन सर्वे अपि प्राणिनः अस्माकं सर्वाणि मित्राणि, माता, पिता, भ्राता, इत्यादयः प्रसन्नाः, भवन्ति । मधुरभाषणेन कापि हानिः नास्ति । अतः सर्वदा मधुरभाषणम् एव करणीयम् । मधुरभाषणे कदापि सङ्कोचः न करणीयः ।



https://withteachers.in/

**ଅର୍ଥ :** ମଧୁରକଥା କହିବା ଦ୍ୱାରା ସମସ୍ତ ପ୍ରାଣୀ ଖୁସି ହୁଅନ୍ତି, ତେଣୁ ସବୁବେଳେ ମଧୁର କଥା କହିବା ଉଚିତ । ମଧୁରକଥା କହିବାରେ କୁଣ୍ଠା ପ୍ରକାଶ କରିବା ଅନୁଚିତ ।



**आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।**
**नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति ।। ५ ।।**

**पदच्छेदः** – आलस्यं हि मनुष्याणां शरीरस्थः महान् रिपुः न अस्ति उद्यमसमः बन्धुः कृत्वा यं न अवसीदति ।

**अन्वयः** – आलस्यं हि मनुष्याणां शरीरस्थः महान् रिपुः (अस्ति) । उद्यमसमः बन्धुः नास्ति, (जनः) यं (उद्यमं) कृत्वा न अवसीदति ।





https://withteachers.in/



**भावार्थः –** आलस्यम् एव मनुष्यस्य शरीरे विद्यमानः महान् शत्रुः अस्ति । तत् एव अस्माकं कार्यस्य सम्पादने अवरोधकं भवति । परिश्रमः एव अस्माकं वास्तविकं मित्रम् अस्ति । यः परिश्रमं करोति सः कदापि दुःखं न प्राप्नोति ।

**ଅର୍ଥ :** ମନୁଷ୍ୟମାନଙ୍କ ଶରୀରରେ ରହୁଥିବା ଆଳସ୍ୟ ହିଁ ତାର ସବୁଠାରୁ ବଡ଼ ଶତ୍ରୁ ଅଟେ । ଉଦ୍ୟମ ପରି ଶ୍ରେଷ୍ଠ ବନ୍ଧୁ ନାହିଁ କାରଣ ଉଦ୍ୟମୀ ବା ପରିଶ୍ରମୀ କେବେ ହେଲେ ଦୁଃଖ ପାଏ ନାହିଁ ।

**अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।**
**परोपकारः पुण्याय पापाय परपीडनम् ।। ६ ।।**

**पदच्छेदः –** अष्टादश – पुराणेषु व्यासस्य वचन – द्वयं
परोपकारः पुण्याय पापाय परपीडनम् ।

**अन्वयः –** अष्टादशपुराणेषु व्यासस्य वचनद्वयम् (अस्ति), परोपकारः पुण्याय परपीड़नं पापाय (च भवति) ।



**भावार्थः –** महर्षेः वेदव्यासस्य अष्टादश – पुराणानां सारः वचनद्वये अस्ति –

- परेषाम् उपकारेण पुण्यं भवति ।
- परेषां पीडनेन पापं भवति इति ।

अतः अस्माभिः सर्वदा परोपकारः करणीयः ।
अन्येषां पीडनं कदापि न करणीयम् ।

**ଅର୍ଥ :** ମହର୍ଷି ବ୍ୟାସଦେବଙ୍କ ରଚିତ ଅଠରଟି ପୁରାଣରେ ଦୁଇଟି ମୁଖ୍ୟ କଥା ରହିଛି । ଯଥା – ପରର ଉପକାର କଲେ ପୁଣ୍ୟ (କଲ୍ୟାଣକାରୀ ସୁଖ) ଓ ପରର ଅପକାର କଲେ (ପୀଡ଼ା ଦେଲେ) ପାପ (ଦୁଃଖ କଷ୍ଟ) ମିଳେ ।



https://withteachers.in/

## वयं शब्दार्थान् जानीयः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषायाम् अर्थः |
|---|---|---|---|---|
| वपुषा | शरीरेण | शरीर से | By physique | ଶରୀରରେ |
| सम्मानन् | आदरः | आदर | Respect | ସମ୍ମାନ |
| हातव्याः | त्यक्तव्याः | छोड़ना चाहिए | Worth discarding | ତ୍ୟାଗକରିବା ଉଚିତ |
| भूतिम् | वैभवम् | ऐश्वर्य | Prosperity | ଐଶ୍ୱର୍ଯ୍ୟ |
| तन्द्रा | निद्रालुता | हल्कीनिंद | drowsiness | ନିଦ୍ରାଳୁତା |
| दीर्घसूत्रता | विलम्बकार्यप्रवृत्तिः | कार्य को आगे टालने की प्रवृत्ति | Procrastination | ବିଳମ୍ବରେ କର୍ମ କରିବାର ପ୍ରବୃତ୍ତି |
| वाञ्छति | इच्छति | चाहता/ ती है | wants/ Desires | ଇଚ୍ଛା କରେ |
| निपातेन | पतनेन | गिरने से | By falling | ପଡ଼ିବା ଦ୍ୱାରା |
| हेतुः | कारणम् | कारण | Reason | କାରଣ |
| तुष्यन्ति | सन्तोषम् अनुभवन्ति | संतुष्ट होते हैं | Feeling satisfied | ଖୁସି ହୁଅନ୍ତି |
| रिपुः | शत्रुः | वैरी | Enemy | ଶତ୍ରୁ |
| पुण्यम् | सत्कर्मणां फलम् | सत्कार्यों के फल | Fruits of meritorious deeds | ପୁଣ୍ୟ |
| परपीडनम् | अन्येभ्यः कष्टप्रदानम् | दूसरों को पीड़ा देना | Bothering others | ଅନ୍ୟକୁ କଷ୍ଟ ଦେବା |



## वयम् अभ्यासं कुर्मः (ଆମେ ଅଭ୍ୟାସ କରିବା)

१. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखतु – (ନିମ୍ନଲିଖିତ ପ୍ରଶ୍ନଗୁଡ଼ିକର ଉତ୍ତର ଏକପଦରେ ଲେଖ)

(क) नरः कतिभिः वकारैः पूजितः भवति ? ..................................................

(ख) पुरुषेण कति दोषाः हातव्याः ? ..................................................



https://withteachers.in/

(ग) सर्वे केन तुष्यन्ति ? ..............................................

(घ) जलबिन्दुनिपातेन क्रमशः कः पूर्यते ? ..............................................

(ङ) आलस्यं केषां महान् रिपुः अस्ति ? ..............................................

**२. निम्नलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखतु – (ନିମ୍ନଲିଖିତ ପ୍ରଶ୍ନଗୁଡ଼ିକର ଉତ୍ତର ପୂର୍ଣ୍ଣ ବାକ୍ୟରେ ଲେଖ)**

(क) नरः कथं पूजितः भवति ?

------------------------------------------------------------

(ख) पुरुषेण के दोषाः हातव्याः ?

------------------------------------------------------------

(ग) सर्वे जन्तवः केन तुष्यन्ति ?

------------------------------------------------------------

(घ) किं कृत्वा मनुष्यः नावसीदति ?

------------------------------------------------------------

(ङ) व्यासस्य वचनद्वयं किम् ?

------------------------------------------------------------

**३. उदाहरणानुसारं श्लोकांशान् यथोचितं योजयतु – ଉଦାହରଣ ଅନୁସାରେ ଶ୍ଲୋକ ଅଂଶଗୁଡ଼ିକୁ ଯୋଡ଼ ?**

| | | | |
|---|---|---|---|
| (क) | विद्यया वपुषा वाचा<br>वस्त्रेण विनयेन च । | • • | निद्रा तन्द्रा भयं क्रोध<br>आलस्यं दीर्घसूत्रता ।। |
| (ख) | षड् दोषाः पुरुषेणेह<br>हातव्या भूतिमिच्छता । | • • | वकारैः पञ्चभिर्युक्तो नरो<br>भवति पूजितः ।। |
| (ग) | जलबिन्दुनिपातेन<br>क्रमशः पूर्यते घटः । | • • | स हेतुः सर्वविद्यानां<br>धर्मस्य च धनस्य च ।। |

**४. निम्नलिखितानां वाक्यानां समानार्थकान् श्लोकांशान् पाठात् चित्वा लिखतु – (ନିମ୍ନଲିଖିତ ବାକ୍ୟଗୁଡ଼ିକର ସମାନ ଅର୍ଥ ପ୍ରକାଶ କରୁଥିବା ଶ୍ଲୋକ ଅଂଶକୁ ପାଠରୁ ବାଛି ଲେଖ)**

(क) मधुरवाण्या सर्वे प्रसन्नाः भवन्ति ।

(ख) परिश्रमेण तुल्यः बान्धवः नास्ति ।

(ग) परोपकारेण मानवस्य पुण्यार्जनं भवति ।



https://withteachers.in/



## वयं जानीमः ଆମେ ଜାଣିବା



### पर्यायपदानि (अमरकोशः)

| | | |
|---|---|---|
| वपुः | – | गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ।। |
| नराः | – | मनुष्याः मानुषाः मर्त्याः मनुजाः मानवाः नराः ।। |
| भूतिः | – | विभूतिर्भूतिरैश्वर्यम् (विभूतिः भूतिः ऐश्वर्यम्) ।। |
| मनः | – | चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः ।। |
| बुद्धिः | – | बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः ।<br>प्रेक्षोपलब्धिश्चित्संवित्प्रतिपत् – ज्ञप्तिचेतनाः ।। |
| धनम् | – | द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु ।<br>हिरण्यं द्रविणं द्युम्नमर्थरैविभवा अपि ।। |
| पण्ड़ित | – | विद्वान्विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः ।<br>धीरो मनीषी ज्ञः प्राज्ञः संख्यावान्पण्ड़ितः कविः ।। |
| दिवाकरः | – | सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः ।<br>भास्कराहस्करब्रध्नः प्रभाकरविभाकराः । |
| जन्तुः | – | प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः ।<br>जातिर्जातं च सामान्यं व्यक्तिस्तु पृथगात्मता ।। |
| रिपुः | – | रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः ।। |





https://withteachers.in/

## गृहकार्यम् (ଗୃହକାର୍ଯ୍ୟ)

१. सुभाषितेषु प्रदत्तानि तृतीयाविभक्तिरूपाणि संगृहय उत्तरपुस्तिकायां लिखतु । तेषां प्रयोगं कृत्वा वाक्यानि अपि लिखतु ।





https://withteachers.in/

# विंशः पाठः
(ବିଂଶ ପାଠ)

# सूर्यनमस्कारः




(सर्वे उत्साहेन योगशिक्षिकायाः समीपं गच्छन्ति)



https://withteachers.in/




छात्राः – नमो नमः आचार्ये !




आचार्या – शुभं भवतु । उपविशन्तु सर्वे ।

छात्राः – आचार्ये ! किम् अद्य भवती अस्मान् योगसनं शिक्षयिष्यति ?

आचार्या – आम् ! समीचीनम् । अद्य सूर्यनमस्कारविधिं जानीमः । अहं प्रथमतः वदामि ।

भवन्तः – सर्वे अनुवदन्तु ।






https://withteachers.in/



(आचार्या प्रथमं साभिनयं वदति छात्राः अनुकुर्वन्ति)

१. ॐ मित्राय नमः। २. ॐ रवये नमः। ३. ॐ सूर्याय नमः ।
४. ॐ भानवे नमः। ५. ॐ खगाय नमः । ७. ॐ पूष्णे नमः ।
८. ॐ हिरण्यगर्भाय नमः । ९. ॐ मरीचये नमः । ९. ॐ आदित्याय नमः ।
१०. ॐ सवित्रे नमः । ११. ॐ अर्काय नमः । १२. ॐ भास्कराय नमः ।
(सर्वान्ते) **ॐ सवितृसूर्यनारायणाय नमः ।**

**आचार्या** – अत्युत्तमम् । इदानीम् एकेन श्लोकेन सूर्यनमस्कारस्य उपकारविषयं वदामि । भवन्तः शृण्वन्तु अनुवदन्तु च ।

**आदित्यस्य नमस्कारान् ये कुर्वन्ति दिने दिने ।**
**आयुः प्रज्ञा बलं वीर्यं तेजस्तेषां च जायते ।।**

एवं योगासनेषु सूर्यनमस्कारः एकः श्रेष्ठः आसनक्रमः अस्ति । सूर्यनमस्कारेण शारीरिकं, मानसिकम्, आध्यात्मिकं च बलं वर्धते । अतः वयं प्रतिदिनं सूर्यनमस्कारं करवाम । स्वस्थं शरीरं स्वस्थं मनः च प्राप्नवाम ।

छात्राः – नमोनमः आचार्ये !






https://withteachers.in/

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषायाम् अर्थः |
|---|---|---|---|---|
| अनुवदन्तु | पश्चात् उच्चारणं कुर्वन्तु | दोहराएँ | Repeat | ଶୁଣି କରି କୁହନ୍ତୁ |
| प्रज्ञा | मेधा | बुद्धि | Intelligence/Wisdom | ଉତ୍ତମ ବୁଦ୍ଧି |
| वीर्यम् | पराक्रमः | वीरता | Vigour | ଶକ୍ତି |
| तेजः | दीप्तिः | कान्ति | Brilliance | କାନ୍ତି |
| आध्यात्मिकम् | अध्यात्म – विषयकम् | आध्यात्मिक | Spiritual | ଆଧ୍ୟାତ୍ମିକ |
| स्वस्थम् | नीरोगम् | स्वस्थ | Healthy | ସୁସ୍ଥ |
| मित्रः, खगः, पूषा,रविः, भानुः, हिरण्यगर्भः, मरीचिः, सविता, अर्कः, भास्करः | सूर्यः | सूरज | Sun | ଏଗୁଡ଼ିକ ସୂର୍ଯ୍ୟଙ୍କର ପ୍ରତିଶବ୍ଦ |



## वयम् अभ्यासं कुर्मः (ଆମେ ଅଭ୍ୟାସ କରିବା)

१. **अधोलिखितानां प्रश्नानाम् उत्तराणि निजभाषया एकपदेन लिखतु – (ନିମ୍ନଲିଖିତ ପ୍ରଶ୍ନଗୁଡ଼ିକର ଉତ୍ତର ନିଜ ଭାଷାରେ ଏକ ପଦରେ ଲେଖ)**

(क) शुभं भवतु इति का वदति ?

(ख) का प्रथमं साभिनयं वदति ?

(ग) वयं प्रतिदिनं किं करवाम ?

(घ) केषु सूर्यनमस्कारः श्रेष्ठः ?

(ङ) आध्यामिकं बलं केन वर्धते ?

२. **अधोलिखितानां प्रश्नानाम् उत्तराणि निजभाषया पूर्णवाक्येन लिखतु – ନିମ୍ନଲିଖିତ ପ୍ରଶ୍ନଗୁଡ଼ିକର ଉତ୍ତର ନିଜ ଭାଷାରେ ପୂର୍ଣ୍ଣବାକ୍ୟରେ ଲେଖ ।**

(क) सर्वे छात्राः आचार्यां किं पृच्छन्ति ?

- - - - - - - - - - - - - - - - - - - - - - - - - - - - - - - - - - - - -

(ख) आचार्या कं श्लोकं पाठयति ?

- - - - - - - - - - - - - - - - - - - - - - - - - - - - - - - - - - - - -



https://withteachers.in/

(ग) सूर्यनमस्कारस्य प्रथमः मन्त्रः कः ?

---

(घ) सूर्यनमस्कारेण कीदृशं बलं वर्धते ?

---

**३. पाठात् समुचितं पदं चित्वा अधः रिक्तस्थानानि पूरयतु – ବିଷୟ ମଧ୍ୟର ଉପଯୁକ୍ତ ପଦ ବାଛି ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର ।**

(क) वयं प्रतिदिनं .............................. करवाम ।

(ख) स्वस्थं .............................. स्वस्थं .............................. च प्राप्नवाम ।

(ग) एकेन .............................. सूर्यनमस्कारस्य उपकारविषयं वदामि ।

(घ) आदित्यस्य .............................. ये कुर्वन्ति दिने दिने ।



## वयं जानीमः (ଆମେ ଜାଣିବା)

'नमः शब्दस्य योगे चतुर्थी विभक्तिः भवति। यथा – भास्कराय नमः ।'

**२. पाठे विद्यमानानां नमः युक्तशब्दानां सङ्ग्रहं कृत्वा लिखतु –**

यथा – मित्राय नमः ।

(क) ..........................

(ख) ..........................

(ग) ..........................

(घ) ..........................

(ङ) ..........................

(च) ..........................

(छ) ..........................

(ज) ..........................

(झ) ..........................

(ञ) ..........................

(ट) ..........................





https://withteachers.in/

## ३. कोष्ठके विद्यमानानां शब्दानां चतुर्थी- विभक्तेः रूपाणि प्रयुज्य वाक्यानि पुनः लिखतु -

यथा – सैनिकः (देश) जीवनं प्रयच्छति । सैनिकः देशाय जीवनं प्रयच्छति ।

(क) माता (याचक) वस्त्रं ददाति । ..........................................

(ख) पौत्रः (पितामही) औषधं ददाति । ..........................................

(ग) अहं (भगिनी) उपायनं ददाति । ..........................................

(घ) पिता (सेविका) वेतनं ददाति । ..........................................

(ङ) भ्राता (मित्र) पुष्पं ददाति । ..........................................

(च) देवः (भक्त) आशीर्वादं ददाति । ..........................................

(छ) आरक्षकः (चोर) दण्डं ददाति । ..........................................

## ४. उदाहरणानुसारं रिक्तस्थानानि पूरयतु - (ଉଦାହରଣ ଅନୁସାରେ ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

| | | | | |
|---|---|---|---|---|
| यथा – गणेश | | गणेशाय | गणेशाभ्याम् | गणेशेभ्यः |
| (क) भक्त | – | भक्ताय | .................. | भक्तेभ्यः |
| (ख) सेविका | – | .................. | सेविकाभ्याम् | सेविकाभ्यः |
| (ग) अनुजा | – | अनुजायै | अनुजाभ्याम् | .................. |
| (घ) कुमारी | – | कुमार्यै | कुमारीभ्याम् | .................. |
| (ङ) वन | – | वनाय | .................. | वनेभ्यः |
| (च) मित्र | – | मित्राय | .................. | मित्रेभ्यः |



## अवधेयम् (ମନେରଖିବା)

- विश्वयोगदिवसः – जगति सर्वे जनाः जूनमासस्य २१ तमं दिनाङ्कं विश्वयोगदिवसरूपेण आचरन्ति ।
- योगसूत्रम् – अस्य प्रणेता महर्षिः पतञ्जलिः अस्ति । अस्मिन् ग्रन्थे १९६ सूत्राणि सन्ति । शरीरस्य मनसः च स्वास्थ्यसम्बद्धाः विषयाः अत्र विद्यन्ते ।
- हठयोगप्रदीपिका – एषः ग्रन्थः स्वात्माराम – स्वामिना विरचितः । अस्मिन् ग्रन्थे विविधानाम् आसनानां विवरणं लभ्यते । तेषु कानिचन आसनानि अधः प्रदर्शितानि । यथा –



https://withteachers.in/



वज्रासनम्



पद्मासनम्



पश्चिमोत्तानासनम्



हलासनम्



ताडासनम्

**उच्चैः पठतु अवगच्छतु च । (ବଡ଼ ପାଟିରେ ପଢ଼ ଓ ବୁଝ)**

**दा - धातुः (परस्मैपदम्), लट् - लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | ददाति | दत्तः | ददति |
| मध्यमपुरुषः | ददासि | दत्थः | दत्थ |
| उत्तमपुरुषः | ददामि | दद्वः | दद्मः |



https://withteachers.in/

### दा - धातुः (परस्मैपदम्), लोट् - लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | ददातु | दत्ताम् | ददतु |
| मध्यपुरुषः | देहि | दत्तम् | दत्त |
| उत्तमपुरुषः | ददानि | ददाव | ददाम |



## गृहकार्यम् (ଗୃହକାର୍ଯ୍ୟ)

१. सूर्यनमस्कारस्य द्वादशानाम् आसनानां भित्तिपत्राणि रचयतु । मन्त्रान् अपि लिखतु ।

२. प्रतिदिनं सकुटुम्बं सूर्यनमस्कारस्य अभ्यासं करोतु ।

३. विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीड़नाय ।
खलस्य साधोर्विपरीतमेतत् ज्ञानाय दानाय च रक्षणाय ।।
अस्मिन् श्लोके विद्यमानानि चतुर्थी - विभक्त्यन्तरूपाणि चित्वा लिखतु ।



https://withteachers.in/



# आम्लं द्राक्षाफलम्

## (ଅଙ୍ଗୁର ଫଳ ଖଟା)

### (गायतु अभिनयं करोतु च)

### (ଗାଅ ଓ ଅଭିନୟ କର)

एक: शृगाल:
एक: शृगाल: वनं गच्छति ।
पिपासा, तस्य बुभुक्षा
पिपासया बुभुक्षया वनं गच्छति
स: वनं गच्छति, स: वनं गच्छति ।
तत्र गच्छति, किमपि न लभते
इतोऽपि गच्छति, किमपि न लभते
श्रान्त: जायते, खिन्न: जायते
स: श्रान्त: जायते, खिन्न: जायते
किं च करोति ? स: किं च करोति ?

वामत: पश्यति, दक्षिणत: पश्यति
अग्रत: पश्यति, पृष्ठत: पश्यति
स्वेद: जायते, तृषा जायते
तस्य स्वेद: जायते, तृषा जायते
किं च पश्यति ? स: किं च पश्यति ?
किं च पश्यति ? स: किं च पश्यति ?



https://withteachers.in/



पश्यति द्राक्षालतां
सः पश्यति द्राक्षाफलम्
उपरि उपरि लतासु दृश्यते च तत्फलम्
अनुक्षणं तन्मुखे रसः जायते
किं च करोति ? सः किं च करोति ?

एकवारम् उत्पतति, द्विवारम् उत्पतति
त्रिवारम् उत्पतति, पुनः पुनः उत्पतति
स्वेदः जायते, तस्य श्रमः जायते
किं कथयति ? सः किं कथयति ?

आम्लं द्राक्षाफलम् आम्लं द्राक्षाफलम्
इत्येवं कथयति, सः पलायते
इत्येवं कथयति, सः पलायते ।।



https://withteachers.in/

# एकविशं: पाठ:
(ଏକବିଂଶ ପାଠ)

# सेवा हि परमो धर्मः






https://withteachers.in/










https://withteachers.in/

नागार्जुनः प्रसिद्धः रसायनशास्त्रज्ञः चिकित्सकः च आसीत् । सः अहोरात्रं प्रयोगशालायां कार्यं करोति स्म । एकदा सः महाराजाय निवेदितवान् – महाराज ! मम चिकित्सिाकार्याय एकः सहायकः आवश्यकः इति। राजा एतद् अङ्गीकृतवान् उक्तवान् च – अस्तु, अहं व्यवस्थां करोमि । श्वः केचन योग्याः युवकाः आगमिष्यन्ति । भवान् परीक्षां कृत्वा तेषु युवकेषु कमपि योग्यं स्वीकरोतु इति ।



अन्यस्मिन् दिने द्वौ युवकौ आगतवन्तौ । नागार्जुनः द्वयोः विद्याभ्यासविषये पृष्टवान् । द्वयोः अपि विद्याभ्यासविषयः समानः एव आसीत् । तदा नागार्जुनः तौ एकं विशिष्टं रसायनं निर्माय आगच्छताम् इति सूचितवान् । तदर्थं दिनद्वयस्य अवसरं दत्तवान् । गमनसमये राजमार्गेण गच्छताम् इत्यपि सूचितवान् ।

दिनद्वयानन्तरं नागार्जुनस्य समीपे प्रथमः युवकः आगतवान् । औषधनिर्माणे किमपि कष्टं न अभवत् खलु ? इति नागार्जुनः पृष्टवान् । युवकः स्वनिष्ठां दर्शयितुं स्वगृहस्य समस्याः वर्णितवान् – पितुः उदरवेदना, मातुः ज्वरः च आसीत् । तथापि अहं तत्सर्वं परित्यज्य औषधं निर्मितवान् इति उक्त्वा नागार्जुनाय रसायनं दत्तवान् ।





https://withteachers.in/



तदभ्यन्तरे द्वितीयः युवकः अपि आगतवान् । सः खिन्नः आसीत् । तमपि नागार्जुनः पृष्टवान् । तदा युवकः उक्तवान् अहम् औषधं निर्मातुं न शक्तवान् इति । 'किमर्थं न शक्तवान्?' इति नागार्जुनः पृच्छति । युवकः उक्तवान् – राजमार्गे अहं कञ्चित् रोगिणं दृष्टवान् ।

तस्य परिस्थितिः शोचनीया आसीत् । अहं तं स्वगृहं नीतवान् । दिनद्वयं तस्य एव सेवायां निरतः आसम् । अद्य प्रातः सः स्वस्थः अभवत् । अहं ततः साक्षात् अत्र आगतवान् । रसायननिर्माणार्थं समयम् एव न प्राप्तवान् इति ।



तदनन्तरं नागार्जुनः द्वितीयं युवकं सहायकत्वेन स्वीकृतवान् । राजा एतं वृत्तान्तं श्रुत्वा आश्चर्यं प्रकटितवान्। सः नागार्जुनं पृष्टवान् – 'प्रथमः युवकः औषधं कृत्वा आनीतवान् । द्वितीयः तथा न कृतवान् । तथापि भवान् किमर्थं द्वितीयं चितवान् ?'

नागार्जुनः अवदत् – 'द्वितीयः अपि औषधनिर्माणे कुशलः अस्ति । किन्तु तेन समयः न प्राप्तः । यतः सः सेवायां निरतः आसीत् । तं रोगिणम् अहं पूर्वमेव मार्गे दृष्टवान् । अतः राजमार्गेण गन्तव्यम् इति अहं युवकद्वयं सूचितवान् । प्रथमः रोगिणं दृष्ट्वा अपि अग्रे गतवान् । सः यन्त्रवत् कार्यं करोति । तस्मिन् सेवायाः भावना नास्ति । सेवाभावनां विना चिकित्सकः कथं भवेत् ? अतः अहं द्वितीयस्य चयनं कृतवान् इति ।'



https://withteachers.in/

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषायाम् अर्थः |
|---|---|---|---|---|
| उपाधिम् | नामचिह्नम् | उपाधि को | Degree | ସମ୍ମାନସୂଚକ ପଦ |
| पदवीम् | पदनाम | पदवी | Designation/Position | ପଦବୀ |
| मानवीयाः | मानवे भवितव्याः | मानवों में होने वाले | Humane | ମାନବ ସମ୍ବନ୍ଧୀୟ |
| रसायनशास्त्रज्ञः | यः औषधशास्त्रं जानाति | रसायन शास्त्र का विशेषज्ञ | Chemist &Druggist | ଔଷଧ ତିଆରି ଜାଣିଥିବା ବ୍ୟକ୍ତି |
| चिकित्सकः | भिषक् | वैद्य | Physician | ଚିକିତ୍ସକ |
| प्रयोगशालायाम् | अनुसन्धान – परीक्षण – कक्षे | प्रयोगशाला में | In the laboratory | ପ୍ରୟୋଗ ପରୀକ୍ଷାଗାର |
| अङ्गीकृतवान् | स्वीकृतवान् | स्वीकार किया | Accepted | ଗ୍ରହଣ କଲେ |
| व्यवस्थाम् | प्रबन्धनम् | व्यवस्था को | Arrangement | ବ୍ୟବସ୍ଥା |
| अन्यस्मिम् दिने | अपरस्मिन् दिवसे | अगले दिन | On another day | ଅନ୍ୟ ଏକ ଦିନରେ |
| राजमार्गः | मुख्यमार्गः | राजमार्ग | Highway | ମୁଖ୍ୟରାସ୍ତା |
| खिन्नः | दुःखितः | दुःखी | Sad | ଦୁଃଖିତ |
| (अहम्) शक्तवान् | समर्थः अभवम् | (मैं) कर सका | (I) could do | ମୁଁ କରିପାରିଛି |
| रोगिणम् | अस्वस्थम् | रोगी को | For sick person | ରୋଗୀକୁ |
| शोचनीया | दयनीया | दुःखदायी | Miserable | ଦୁଃଖଦାୟକ |
| निरतः | लीनः | मग्न | Engrossed | ଲାଗିରହିବା |
| वृत्तान्तम् | घटनाम् | प्रसङ्ग को | Anecdote | ଘଟଣା |
| चितवान् | चयनं कृतवान् | चुना | Selected | ବାଛିଲା |
| यन्त्रवत् | यन्त्रम् इव | यन्त्र की भाँति | Like a machine | ଯନ୍ତ୍ରପରି |
| कषायम् | क्वाथम् | काढ़ा को | Herbal decoction | କଷାରସ (କ୍ୱାଥ) |



https://withteachers.in/

### अत्र इदम् अवधेयम्

- रसायनम् इति शब्दः आयुर्वेदशास्त्रे औषधम् इत्यस्मिन् विषये प्रयुज्यते ।
- क्तवतु – प्रत्ययस्य प्रयोगः भूतकालार्थे अपि भवति ।

| | | | |
|---|---|---|---|
| पठ् + क्तवतु = | (पुलिङ्गे) | पठितवान् (एकवचनम्) | पठितवन्तः (बहुवचनम्) |
| | (स्त्रीलिङ्गे) | पठितवती (एकवचनम्) | पठितवत्यः (बहुबचनम्) |

उदाहरणानि –

| | |
|---|---|
| सः पठितवान् । | सा पठितवती । |
| छात्रः पठितवान् । | राधिका पठितवती । |
| बालकाः पठितवन्तः । | बालिकाः पठितवत्यः । |
| त्वं पठितवान् । | त्वं पठितवती । |
| अहं पठितवान् । | अहं पठितवती । |



## वयम् अभ्यासं कुर्मः (ଆମେ ଅଭ୍ୟାସ କରିବା)

१. **अधोलिखितानां प्रश्नानाम् एकपदेन पदद्वयेन वा उत्तराणि लिखतु – ନିମ୍ନଲିଖିତ ପ୍ରଶ୍ନଗୁଡ଼ିକର ଉତ୍ତର ନିଜ ଭାଷାରେ ଗୋଟିଏ ବା ଦୁଇଟି ପଦରେ ଲେଖ ।**

(क) कः प्रसिद्धः चिकित्सकः आसीत् ?
(ख) अन्यस्मिन् दिवसे कौ आगतौ ?
(ग) कः खिन्नः आसीत् ?
(घ) रुग्णस्य परिस्थितिः कथम् आसीत् ?
(ङ) नागार्जुनः सहायकरूपेण कं चितवान् ?
(च) कां विना चिकित्सकः न भवति ?
(छ) नागार्जुनः युवकौ केन मार्गेण गन्तुं सूचितवान् ?

२. **अधोलिखितानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखतु – (ନିମ୍ନଲିଖିତ ପ୍ରଶ୍ନଗୁଡ଼ିକର ଉତ୍ତର ନିଜ ଭାଷାରେ ପୂର୍ଣ୍ଣବାକ୍ୟରେ ଲେଖ)**

(क) अहोरात्रं नागार्जुनः कुत्र कार्यं करोति स्म ?
(ख) नागार्जुनः महाराजाय किं निवेदितवान् ?
(ग) प्रथमः युवकः कथं कार्यं कृतवान् ?
(घ) द्वितीयः युवकः राजमार्गे रोगिणं दृष्ट्वा किं कृतवान् ?
(ङ) सेवायाः भावनां विना किं न भवेत् ?



## गृहकार्यम् (ଗୃହକାର୍ଯ୍ୟ)

१. **परहिततार्थं सेवारतानां महापुरुषाणां जीवनकथां संगृह्णातु ।**
२. **भवतां परिवेशे विद्यमानानाम् आयुर्वेदीयशस्यानां पदार्थानां च नामानि लिखतु ।**



https://withteachers.in/

# द्वविंशः पाठः
## (ଦ୍ୱାବିଂଶ ପାଠ)
# अन्त्याक्षरी क्रीडा






https://withteachers.in/

| ज्ञानमालागणः | रत्नमालागणः |
|---|---|
| १. रूपयौवनसम्पन्ना विशालकुलसम्भवाः ।<br>विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ।। १ ।। (क्) | १. काव्यशास्त्रोविनोदेन कालो गच्छति धीमताम्।<br>व्यसनेन च मूर्खाणां निद्रया कलहेन वा ।।२।। (व्) |
| २. विद्या विवादाय धनं मदाय,<br>शक्तिः परेषां परिपीडनाय।<br>खलस्य साधोर्विपरीतमेतत्,<br>ज्ञानाय दानाय च रक्षणाय ।। ३ ।। (य्) | २. येषां न विद्या न तपो न दानं,<br>ज्ञानं न शीलं न गुणो न धर्मः ।<br>ते मर्त्यलोके भुवि भारभूताः,<br>मनुष्यरूपेण मृगाश्चरन्ति ।। ४ ।। (त्) |
| ३. तदा वृत्तिश्च कीर्त्तिश्च लक्ष्मीर्वाणी यशस्विनी ।<br>तत्त्वज्ञानं परा शान्तिर्यदा विद्या भवेत्तव ।। ५ ।। (व्) | ३. विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं,<br>विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः ।<br>विद्या बन्धुजनो विदेशगमने विद्या परा देवता,<br>विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः ।।६।।(श्) |
| ४. शनैः पन्थाः शनैः कन्था शनैः पर्वतलङ्घनम् ।<br>शनैर्विद्या शनैर्वित्तं<br>पञ्चैतानि शनैः शनैः ।।७।।(न्) | ४. न विद्यया विना सौख्यं नराणां जायते ध्रुवम् ।<br>अतो धर्मार्थमोक्षेभ्यो विद्याभ्यासं समाचरेत् ।। ८ ।। (त्) |
| ५. ताराणां भूषणं चन्द्रः लतानां भूषणं सुमम्।<br>पृथिव्या भूषणं राजा विद्या<br>सर्वस्य भूषणम् ।। ९ ।।(ण/न्) | ५. न चोरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि ।<br>व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम् ।। १० ।।<br>(न्) |

**रूपयौवनसम्पन्ना विशालकुलसम्भवाः ।**
**विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ।। १ ।।**

**पदच्छेदः –** रूप – यौवन – सम्पन्नाः विशाल – कुल – सम्भवाः विद्या – हीनाः न शोभन्ते निर्गन्धाः इव किंशुकाः ।

**अन्वयः –** रूपयौवनसम्पन्नाः विशालकुलसम्भवाः (परन्तु) विद्याहीनाः (जनाः) निर्गन्धाः किंशुकाः इव न शोभन्ते ।

**भावार्थः –** येषां सुन्दररूपम् अस्ति, यौवनम् अस्ति, उत्तमे कुले जन्म अपि प्राप्तम्, किन्तु ते यदि विद्यायाः अर्जन न कुर्वन्ति तर्हि तेषां शोभा न भवति । यथा पुष्पिताः पलाशवृक्षाः दर्शने अतीव सुन्दराः सन्ति, किन्तु तेषु सुगन्धः न भवति। जनाः तेषाम् उपयोगं न कुर्वन्ति । अतः रूपस्य यौवनस्य उच्चकुलस्य च अपेक्षया विद्या एव श्रेष्ठा ।

**अर्थ :** ଗନ୍ଧହୀନ ଫୁଲରେ ଭରପୂର ପଲାଶ ଗଛପରି ସୁନ୍ଦର ରୂପ ଓ ଯୌବନର ଅଧିକାରୀ ତଥା ଉଚ୍ଚବଂଶରେ ଜାତ ହୋଇଥିବା ବ୍ୟକ୍ତି ବିଦ୍ୟାର ଅଧିକାରୀ ହୋଇନଥିଲେ ଆଦରଣୀୟ ହୁଏ ନାହିଁ ।



https://withteachers.in/

**काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।**
**व्यसनेन च मूर्खाणां निद्रया कलहेन वा ।। २ ।।**



**पदच्छेदः** – काव्य – शास्त्र – विनोदेन कालः गच्छति धीमताम् व्यसनेन च मूर्खाणाम् निद्रया कलहेन वा ।

**अन्वयः** – धीमतां कालः काव्यशास्त्रविनोदेन मूर्खाणां च (कालः) व्यसनेन निद्रया कलहेन वा गच्छति ।

**भावार्थः** – बुद्धिमन्तः जनाः काव्यानां शास्त्राणां च अनुशीलनेन समयस्य सदुपयोगं कुर्वन्ति, परन्तु मूर्खजनाः शयनं कृत्वा, परस्परं कलहं कृत्वा अथवा दुर्व्यसनेन अमूल्यसमयस्य दुरुपयोगं कुर्वन्ति, अतः वयं नित्यं विद्याभ्यासेन पठनेन लेखनेन वा समयस्य सदुपयोगं कुर्मः ।

**अर्थ :** ବିଦ୍ୱାନମାନେ କାବ୍ୟଶାସ୍ତ୍ର ଚର୍ଚ୍ଚା କରି ସମୟର ସଦୁପଯୋଗ କରନ୍ତି ମାତ୍ର ମୂର୍ଖମାନେ ବିଳାସବ୍ୟସନ, ନିଦ୍ରା ଓ କଳିତକରାଳରେ ସମୟ ନଷ୍ଟ କରିଥାନ୍ତି ।

**विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय**
**खलस्य साधोर्विपरीतमेतत् ज्ञानाय दानाय च रक्षणाय ।। ३ ।।**

**पदच्छेदः** – विद्या विवादाय धनं मदाय शक्तिः परेषाम् परिपीडनाय खलस्य साधोः विपरीतम् एतत् ज्ञानाय दानाय च रक्षणाय ।



**अन्वयः** – खलस्य विद्या विवादाय, धनं मदाय, शक्तिः परेषां परिपीड़नाय (च भवति)। (परं) साधोः एतद् – विपरीतं (विद्या) ज्ञानाय (धनं) दानाय (शक्तिः) रक्षणाय च (भवति)।

**भावार्थः** – दुष्टः जनः विद्यायाः उपयोगं कलहार्थं करोति धनस्य उपायोगम् अहङ्कारार्थं करोति सामर्थ्यस्य उपयोगम् अन्येषां पीडनार्थं च करोति, किन्तु सज्जनस्य स्वभावः एतस्य विपरीतः भवति । सः विद्यायाः उपयोगं स्वस्य अन्येषां च ज्ञानवर्धनार्थं करोति । धनस्य उपयोगं दानार्थं करोति । सामर्थ्यस्य उपयोगं दुर्बलानां रक्षणार्थं च करोति ।

**अर्थ :** ଦୁଷ୍ଟଲୋକର ବିଦ୍ୟା ବିବାଦ ପାଇଁ, ଧନ ଅହଂକାର ପାଇଁ ଓ ଶକ୍ତି ଅନ୍ୟକୁ ପୀଡ଼ା ଦେବା ପାଇଁ ଉଦ୍ଦିଷ୍ଟ ; ମାତ୍ର ଅନ୍ୟ ପକ୍ଷରେ ଏହାର ବିପରୀତ ଲକ୍ଷଣ ସାଧୁମାନଙ୍କ ପାଖରେ ଦେଖାଯାଏ ଯଥା – ସେମାନଙ୍କର ବିଦ୍ୟା ଜ୍ଞାନ ଆହରଣ ପାଇଁ ଧନ ଦାନ ପାଇଁ ଓ ଶକ୍ତି ସାମର୍ଥ୍ୟ ଅନ୍ୟମାନଙ୍କର ସୁରକ୍ଷା ପାଇଁ ଉଦ୍ଦିଷ୍ଟ ।



https://withteachers.in/

**येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः**
**ते मर्त्यलोके भुवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति ।। ४ ।।**

**पदच्छेदः** – येषाम् न विद्या न तपः न दानम् ज्ञानम् न शीलम् न गुणः न धर्मः ते मर्त्य – लोके भुवि भार – भूताः मनुष्य – रूपेण मृगाः चरन्ति ।

**अन्वयः** – येषां (जनांना) विद्या न, तपः न, दानं न, ज्ञानं न, शीलं न, गुणः न, धर्मः (अपि) न (अस्ति), ते मर्त्यलोके भुवि भारभूताः मृगाः इव मनुष्यरूपेण चरन्ति ।

**भावार्थः** – ये जनाः विद्यां न अर्जयन्ति, कठिनव्रतं न आचरन्ति, दानं न कुर्वन्ति, ज्ञानं न अर्जयन्ति उत्तमचरित्रवन्तः न भवन्ति गुणवन्तः न सन्ति, धर्माचरणं न कुर्वन्ति, ते अस्यां भूमौ भारभूताः सन्तः पशवः इव इतस्ततः भ्रमन्ति ।

**अर्थ** : ଯେଉଁ ଲୋକମାନେ ବିଦ୍ୟା, ତପସ୍ୟା, ଦାନ, ଜ୍ଞାନ, ଉତ୍ତମସ୍ୱଭାବ, ଗୁଣ ଓ ଧର୍ମର ଅଧିକାରୀ ନୁହନ୍ତି, ସେମାନେ ପୃଥିବୀର ଭାରପରି ମନୁଷ୍ୟରୂପଧାରୀ ପଶୁତୁଲ୍ୟ ଅଟନ୍ତି ।



**तदा वृत्तिश्च कीर्तिश्च लक्ष्मीर्वाणी यशस्विनी ।**
**तत्त्वज्ञानं परा शान्तिर्यदा विद्या भवेत्तव ।। ५ ।।**



**पदच्छेदः** – तदा वृत्तिः च कीर्तिः च लक्ष्मीः वाणी यशस्विनी तत्त्वज्ञानम् परा शान्तिः यदा विद्या भवेत् तव ।

**अन्वयः** – यदा विद्या भवेत्, तदा तव वृत्तिः, कीर्त्तिः, लक्ष्मीः, यशस्विनी वाणी, तत्त्वज्ञानं, परा शान्तिः च (भवेत्) ।

**भावार्थः** – यदि त्वं विद्याम् अर्जयसि तर्हि त्वम् उद्योगं, यशः धनं कीर्त्तिप्रदां वाणीं, वास्तविकं ज्ञानम् उत्तमां शान्तिं च प्राप्नोषि, अतः निरन्तरं विद्यार्जनं करणीयम् ।

**अर्थ** : ଯେତେବେଳେ ତୁମେ ବିଦ୍ୟା ଅର୍ଜନ କରିବ ସେତେବେଳେ ତୁମେ ବୃତ୍ତି, କୀର୍ତ୍ତି, ଲକ୍ଷ୍ମୀ, ଯଶସ୍ୱିନୀ ବାଣୀ, ତତ୍ତ୍ୱଜ୍ଞାନ ଓ ପରମଶାନ୍ତି ଲାଭ କରିବ ।



https://withteachers.in/

**विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं**
**विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः ।**
**विद्या बन्धुजनो विदेशगमने विद्या परा देवता**
**विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः ।। ६ ।।**



**पदच्छेदः** – विद्या नाम नरस्य रूपम् अधिकम् प्रच्छन्न – गुप्तं धनम् विद्या भोगकरी यशः – सुखकरी विद्या गुरूणाम् गुरुः विद्या बन्धु – जनः, विदेश – गमने विद्या परा देवता विद्या राजसु पूज्यते न हि धनम् विद्या–विहीनः पशुः ।

**अन्वयः** – विद्या नाम नरस्य अधिकं रूपं प्रच्छन्नगुप्तं धनं (च अस्ति) । विद्या भोगकरी यशः सुखकरी (च अस्ति) । विद्या गुरूणां गुरुः (अस्ति)। विद्या विदेशगमने बन्धुजनः (भवति) । विद्या परा देवता (अस्ति) । विद्या राजसु पूज्यते, धनं न हि (पूज्यते)। विद्याविहीनः (जनः) पशुः (भवति) ।

**भावार्थः** – विद्या मनुष्यस्य श्रेष्ठं सौन्दर्यम् अस्ति, अदृश्यं गुप्तं च धनम् अस्ति । विद्या आनन्दं जनयति, कीर्त्तिं वर्धयति, सुखं च प्रददाति । विद्या गुरूणां गुरुः अस्ति । विदेशयात्रायां विद्या बन्धुः भवति । विद्या प्रधाना देवता अस्ति । राजसभासु विदुषाम् एव सम्मानः भवति, न तु धनिकस्य अतः यः विद्याहीनः भवति सः पशुसमानः भवति ।

**ଅର୍ଥ :** ବିଦ୍ୟା ହିଁ ମନୁଷ୍ୟର ଶ୍ରେଷ୍ଠ ସୌନ୍ଦର୍ଯ୍ୟ, ଗୁପ୍ତଧନ, ଆନନ୍ଦଦାୟକ, କୀର୍ତ୍ତିବର୍ଦ୍ଧକ ଓ ସୁଖକାରକ ଅଟେ । ବିଦ୍ୟା ଗୁରୁମାନଙ୍କ ଗୁରୁ ଓ ବିଦେଶଯାତ୍ରା ସମୟରେ ବନ୍ଧୁ ତଥା ଶ୍ରେଷ୍ଠ ଦେବତା ପରି ଅଟେ । ରାଜସଭାରେ ଧନୀ ନୁହେଁ ବିଦ୍ୱାନ ବ୍ୟକ୍ତି ହିଁ ସମ୍ମାନିତ ହୁଏ । ସଂସାରରେ ବିଦ୍ୟାହୀନ ବ୍ୟକ୍ତି ପଶୁ ତୁଲ୍ୟ ଅଟେ ।





https://withteachers.in/

**शनैः पन्थाः शनैः कन्था शनैः पर्वतलङ्घनम् ।**
**शनैर्विद्या शनैर्वित्तं पञ्चैतानि शनैः शनैः ।। ७ ।।**



**पदच्छेनः** – शनैः पन्थाः शनैः कन्था शनैः पर्वत – लङ्घनम् शनैः विद्या शनैः वित्तम् पञ्च एतानि शनैः शनैः ।

**अन्वयः** – पन्थाः शनैः, कन्था शनैः, पर्वतलङ्घनं शनैः, विद्या शनैः, वित्तं शनैः च एतानि पञ्च (कार्याणि) शनैः शनैः (करणीयानि) ।

**भावार्थः** – मनुष्यः सर्वदा गमनसमये सावधानं चलेत् । वस्त्रस्य सीवनं जागरूकतया कुर्यात् । पर्वतस्य उपरि आरोहणं क्रमेण कुर्यात् । विद्यां धनं च निरन्तरं प्रयत्नेन अर्जयेत । एतानि पञ्च कार्याणि शनैः अर्थात् सोपानक्रमेण एव कुर्यात् ।

**ଅର୍ଥ :** ଧୀରେ ଧୀରେ ନିରବଚ୍ଛିନ୍ନ ଭାବରେ କାର୍ଯ୍ୟ କଲେ ମନୁଷ୍ୟ ନିଶ୍ଚିତ ସଫଳତା ଲାଭ କରେ । ଯେପରି ଦୀର୍ଘପଥକୁ ଧୀରେ ଧୀରେ ଚାଲି ଲକ୍ଷ୍ୟସ୍ଥଳରେ ପହଞ୍ଚି ହୁଏ । ସେହିପରି ଧୀରେ ଧୀରେ କପଡ଼ାକୁ ଯୋଡ଼ି ସିଲାଇ କରି କନ୍ଥା ତିଆରି କରାଯାଏ ପର୍ବତକୁ ମଧ୍ୟ ଅତିକ୍ରମ କରିହୁଏ । ସବୁ ବିଦ୍ୟାକୁ ଆୟତ୍ତ କରାଯାଇପାରେ ଓ ବହୁତ ଧନ ସଂଗ୍ରହ କରିହୁଏ ।

**न विद्यया विना सौख्यं नराणां जायते ध्रुवम् ।**
**अतो धर्मार्थमोक्षेभ्यो विद्याभ्यासं समाचरेत् ।। ८ ।।**



**पदच्छेदः** –न विद्यया विना सौख्यम् नराणाम् जायते ध्रुवम् अतः धर्म – अर्थ – मोक्षेभ्यः, विद्याभ्यासम् समाचरेत् ।

**अन्वयः** – विद्यया विना नराणां सौख्यं ध्रुवं न जायते । अतः धर्म – अर्थ – मोक्षेभ्यः विद्याभ्यासं समाचरेत्।

**भावार्थः** – मानवानां कृते विद्यार्जनम् अत्यन्तम् अनिवार्यं भवति । यदि नराः विद्यार्जनं न कुर्वन्ति तर्हि सुखं नूनं न प्राप्नुवन्ति । अतः धर्मसाधनाय अर्थलाभाय मोक्षं प्राप्तुं च विद्याभ्यासं कुर्यात् ।

**ଅର୍ଥ :** ମନୁଷ୍ୟମାନେ ବିଦ୍ୟା ବିନା ପ୍ରକୃତ ସୁଖ ପା'ନ୍ତି ନାହିଁ । ଏଣୁ ଧର୍ମ ଅର୍ଥ ଓ ମୋକ୍ଷ ଲାଭ ପାଇଁ ବିଦ୍ୟା ଅଭ୍ୟାସ କରିବା ଉଚିତ ।



https://withteachers.in/

**तारणां भूषणं चन्द्रः लतातां भूषणं सुमम् ।**
**पृथिव्याः भूषणं राजा विद्या सर्वस्य भूषणम् ।। ९ ।।**



**पदच्छेदः** – ताराणाम् भूषणम् चन्द्रः लतानाम् भूषणम् सुमम् पृथिव्याः भूषणम् राजा विद्या सर्वस्य भूषणम् ।

**अन्वयः** – चन्द्रः ताराणां भूषणम् (अस्ति), सुमं लतानां भूषणम् (अस्ति), राजा पृथिव्याः भूषणम् (अस्ति), (परं) विद्या सर्वस्य भूषणम् (अस्ति) ।

**भावार्थः** – तारकाः चन्द्रेण सह शोभन्ते । लताः कुसुमैः सह शोभन्ते । राजा पृथिव्याः शोभां वर्धयति । विद्यया सर्वेषां मनुष्याणां शोभा वर्धते ।

**ଅର୍ଥ :** ଚନ୍ଦ୍ର ତାରାମାନଙ୍କର ଭୂଷଣ, ଫୁଲ ଲତାଗୁଡ଼ିକର ଭୂଷଣ, ରାଜା ପୃଥିବୀର ଭୂଷଣ କିନ୍ତୁ ବିଦ୍ୟା ସମସ୍ତଙ୍କର ଭୂଷଣ ଅଟେ ।

**न चोरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि ।**
**व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम् ।। १० ।।**



**पदच्छेदः** – न चोर – हार्यम् न च राज – हार्यम् न भ्रातृ – भाज्यम् न च भारकारि व्यये कृते वर्धते एव नित्यम् विद्या – धनम् सर्व – धन – प्रधानम् ।

**अन्वयः** – (विद्याधनं) चोरहार्यं न (अस्ति), राजहार्यं न (अस्ति), भ्रातृभाज्यं न (अस्ति), भारकारि च न (अस्ति), व्यये कृते (विद्याधनं) नित्यं वर्धते एव, (अतः) विद्याधनं सर्वधनप्रधानम् (अस्ति) ।

**भावार्थः** – चोरः धनं चोरयितुं शक्नोति । राजा धनम् अपहर्तुं शक्नोति । भ्रातृषु धनस्य विभाजनं भवितुम् अर्हति । धनस्य व्ययेन धनं न्यूनं भवति, किन्तु विद्यारूपं धनं चोरः चोरयितुं न शक्नोति । राजा तस्य अपहरणं कर्तुं न शक्नोति।

विद्याधनस्य विभाजनं न भवति । विद्या भारयुक्ता न भवति । विद्यायाः वितरणेन विद्याधनम् अधिकं वर्धते, अतः सर्वधनेषु विद्याधनम् एव प्रमुखं धनम् अस्ति ।

**ଅର୍ଥ :** ବିଦ୍ୟା ସବୁ ଧନ ମଧ୍ୟରେ ଶ୍ରେଷ୍ଠ, କାରଣ ଏହାକୁ ଚୋର ଚୋରିକରିପାରେ ନାହିଁ ରାଜା ହରଣ କରିପାରେ ନାହିଁ । ଭାଇ ଭଉଣୀମାନଙ୍କ ମଧ୍ୟରେ ବଣ୍ଟା ଯାଇପାରେ ନାହିଁ । ଏହା ଓଜନିଆ (ବୋଝ) ନୁହେଁ ; ଏବଂ ଏହାକୁ ବ୍ୟୟ କଲେ (ସଦୁପଯୋଗ କଲେ) କ୍ରମେ ବଢ଼ିଚାଲେ ।



https://withteachers.in/

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषायाम् अर्थः |
|---|---|---|---|---|
| ननु | खलु | है न | Isn't it | ନିଶ୍ଚୟ |
| रूपयौवनसम्पन्ना: | सौन्दर्येण यौवनेन च युक्ता: | सौन्दर्य और यौवन से सप्पन्न | Handsome & Youthful | ରୂପଯୌବନ ଅଧିକାରୀ |
| विशालकुलसम्भवा: | महति परिवारे जाता: | विशिष्ट परिवार में जन्मे हुए | Born in a noble family | ଉଚ୍ଚକୁଳଜାତ |
| निर्गन्धा: | गन्धहीना: | गन्धहीन | Without fragance | ଗନ୍ଧହୀନ |
| किंशुका: | पलाश वृक्षा: | ढाका/हेसूका पेढ | a kind of tree | ପଳାଶଗଛ |
| धीमताम् | बुद्धिमताम् | बुद्धिमान् लोगों का | Of Intelligent people | ବିଦ୍ୱାନମାନଙ୍କରେ |
| व्यसनेन | भोगविलासेन | भोग – विलास के द्वारा | By the addiction and bad habits | ଭୋଗବିଳାସ ଦ୍ୱାରା |
| मदाय | गर्वाय | अभिमान के लिए | For arrogance | ଗର୍ବ ପାଇଁ |
| परिपीडनाय | कष्टदानाय | कष्ट देने के लिए | For troubling | ପୀଡ଼ାଦେବା ପାଇଁ |
| खल: | दुष्ट: | दुर्जन | Wicked | ଦୁର୍ଜନ |
| शीलम् | वृत्तम् | चरित्र | Character | ସ୍ୱଭାବ |
| मर्त्यलोके | पृथिव्याम् | संसार में | In this world | ପୃଥିବୀରେ |
| भुवि | भूमौ | धरती पर | On the earth | ଭୂମି ଉପରେ |
| भारभूता: | भारकरा: | भार | Burden | ବୋଝ ପରି |
| कठिनव्रतम् | दीक्षा/ सङ्कल्पपूर्वकं कर्म | कठोर नियम का पालन | Strict observance | କଠିନ ନିୟମ ପାଳନ |
| वृत्ति: | उद्योग: | आजीविका | Occupation | ଜୀବିକା |
| लक्ष्मी: | सम्पत् | सम्पत्ति | Wealth | ଧନ ସମ୍ପଦ |
| यशस्विनी | कीर्त्तियुक्ता | कीर्ति से युक्त | Endowed with fame | କୀର୍ତ୍ତିମତୀ |
| तत्वज्ञानम् | वास्तविकं ज्ञानम् | यथार्थ ज्ञान | Real knowledge | ଯଥାର୍ଥଜ୍ଞାନ |
| प्रच्छन्नगुप्तम् | आवृतं रक्षितं च | ढँका हुआ और सुरक्षित | Conceale and protected | ଗୋପନକରେ ରକ୍ଷିତ |
| भोगकरी | भोग्यवस्तूनां प्रदात्री | सुख – सुविधाओं को देने वाली/ भोग्य वस्तुओं को देने वाली | That which gives | ସୁଖ ସୁବିଧା ଦେଉଥିବା |



https://withteachers.in/

| शब्दः | अर्थः | हिन्दी | English | मातृभाषायाम् अर्थः |
|---|---|---|---|---|
| यशः सुखकरी | या कीर्त्तिं सुखं च ददाति | ख्याति तथा सुख देने वाली | That which gives fame and happiness | ପ୍ରଶଂସା ଓ ସମ୍ମାନ ଦେଉଥିବା |
| विदेशगमने | अन्यदेशेषु भ्रमणसमये | विदेश जाने पर | While travelling other places | ବିଦେଶ ଭ୍ରମଣ ସମୟରେ |
| परा | श्रेष्ठा | श्रेष्ठ | Great | ଶ୍ରେଷ୍ଠ |
| विद्याविहीनः | ज्ञानरहितः | विद्या – रहित | Devoid of education | ବିଦ୍ୟାହୀନ |
| पन्थाः | मार्गः | पथ | The way/Route /Road | ବାଟ |
| कन्था | पुरातनवस्त्रैः निर्मितम् आस्तरणम् | जीर्ण – शीर्ण वस्त्रों से बनी मोटी चादर | Rug made from rags | କନ୍ଥା |
| वित्तम् | धनम् | धन | Money | ଧନ |
| सौख्यम् | सुखम् | आनन्द | Happiness | ସୁଖ |
| ध्रुवम् | स्थिरम् | निश्चित | Certain | ନିଶ୍ଚିତ |
| समाचरेत | करणीयम् | करना चाहिए | Should do | କରିବା ଉଚିତ |
| अनिवार्यम् | अत्यन्तम् आवश्यकम् | अत्यन्त आवश्यक | Mandatory | ବାଧ୍ୟତାମୂଳକ |
| ताराणाम् | नक्षत्राणाम् | नक्षत्रों का | Of the Stars | ତାରାମାନଙ୍କର |
| भूषणम् | अलङ्कारः | आभूषण | Ornament | ଅଳଙ୍କାର |
| सुमम् | कुसुमम् | पुष्प | Flower | ଫୁଲ |
| चोरहार्यम् | चोरेण हरणयोग्यम् | चोर के द्वारा हरण योग्य | Can be stolen by thieves | ଚୋରି କରିବା ଯୋଗ୍ୟ |
| राजहार्यम् | शासकेन हरणयोग्यम् | राजा के द्वारा हरण करने योग्य | Able to be grabbed by King | ରାଜାଙ୍କଦ୍ୱାରା ନେବା ଯୋଗ୍ୟ |
| वितरणेन | सर्वेभ्यः प्रदानेन | बाँटने से | By distribution | ବାଣ୍ଟିବା ଦ୍ୱାରା |
| भ्रातृभाज्यम् | भ्रातृ – भगिनीषु विभाजनयोग्यम् | भाई – बहनों में बाँटने योग्य | Fit to be distributed amongst siblings | ଭାଇଭଉଣୀମାନଙ୍କ ମଧ୍ୟରେ ବଣ୍ଟନଯୋଗ୍ୟ |
| भारकारि | भारभूतम् | भार स्वरूप | Heavy | ଓଜନିଆବୋଝ |
| व्यये कृते | यदि व्ययः क्रियते | खर्च करने पर | By spending | ଖର୍ଚ୍ଚ କଲେ |



https://withteachers.in/

| शब्द: | अर्थ: | हिन्दी | English | मातृभाषायाम् अर्थ: |
|---|---|---|---|---|
| विद्याधनम् | विद्यानामकं धनम् | विद्या रूपी धन | Wealth in the form of knowledge | ବିଦ୍ୟାରୂପକ ଧନ |
| सर्वधनप्रधानम् | सर्वेषु धनेषु मुख्यम् | सभी प्रकार के धनों में प्रमुख | Most important amongst all kinds of wealth | ସବୁ ଧନ ମଧ୍ୟରେ ଶ୍ରେଷ୍ଠ |



## वयम् अभ्यासं कुर्म: (ଆମେ ଅଭ୍ୟାସ କରିବା)

**१. अध: प्रदत्तानां प्रश्नानाम् एकपदेन उत्तरं लिखतु –**
**ନିମ୍ନଲିଖିତ ପ୍ରଶ୍ନଗୁଡ଼ିକର ଉତ୍ତର ନିଜ ଭାଷାରେ ଏକପଦରେ ଲେଖ ।**

(क) विद्याहीना: कीदृशा: किंशुका: इव न शोभन्ते ?

(ख) धीमतां काल: कथं गच्छति ?

(ग) केषां काल: निद्रया कलहेन वा गच्छति ?

(घ) खलस्य विद्या किमर्थम् ?

(ङ) सज्जनस्य विद्या किमर्थम् ?

(च) चन्द्र: केषां भूषणम् अस्ति ?

(छ) सर्वधनप्रधानं किम् ?

**२. अध: प्रदत्तानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखतु –**
**(ନିମ୍ନଲିଖିତ ପ୍ରଶ୍ନଗୁଡ଼ିକ ପୂର୍ଣ୍ଣବାକ୍ୟରେ ଉତ୍ତର ଲେଖ)**

(क) निर्गन्धा: किंशुका: इव के न शोभन्ते ?

(ख) मूर्खाणां काल: कथं गच्छति ?

(ग) दुर्जन: विद्याया: धनस्य शक्ते: च उपयोगं कथं करोति ?

(घ) कीदृशा: मनुष्या: भुवि भारभूता: भवन्ति ?

(ङ) शनै: शनै: कानि साधनीयानि ?



https://withteachers.in/

३. उचितान् वाक्यांशान् परस्परं संयोजयन्तु –
(ସ୍ତମ୍ଭ ମେଳନ କର)

| (क) | (ख) |
|---|---|
| तदा वृत्तिश्च कीर्तिश्च | पञ्चैतानि शनैः शनैः |
| खलस्य साधोर्विपरीतमेतत् | निर्गन्धा इव किंशुकाः |
| शैनर्विद्या शनैर्वित्तं | यदा विद्या भवेत्तव |
| विद्याहीना न शोभन्ते | न भ्रातृभाज्यं न च भारकारि |
| न चोरहार्यं न च राजहार्यम् | ज्ञानाय दानाय च रक्षणाय |
| विद्या राजसु पूज्यते | विद्याभ्यासं समाचरेत |
| अतो धर्मार्थमोक्षेभ्यः | न हि धनम् |



## वयं जानीमः (ଆମେ ଜାଣିବା)





### विद्यायाः सन्दर्भे श्लोकाः

नास्ति विद्यासमो बन्धुर्नास्ति विद्यासमः सुहृत् ।
नास्ति विद्यासमं वित्तं नास्ति विद्यासमं सुखम् ।।
विद्याभ्यासस्तपो ज्ञानमिन्द्रियाणां च संयमः ।
अहिंसा गुरुसेवा च निःश्रेयसकरं परम् ।।
ज्ञातिभिर्वण्ट्यते नैव चोरेणापि न नीयते ।
दाने नैव क्षयं याति विद्यारत्नं महाधनम् ।।



## गृहकार्यम् (ଗୃହକାର୍ଯ୍ୟ)

१. क, त, व, म, य इति पञ्चभिः वर्णैः श्लोकान् सङ्गृह्य स्फोरकपत्रे लिखतु, शिक्षकस्य अनुमत्या कक्षाभित्तिषु स्थापयतु ।

२. यथा अस्मिन् पाठे अन्त्याक्षरीश्लोकाः दत्ताः सन्ति तथैव विविधस्त्रोतोभ्यः (ग्रन्थालयः, अन्तर्जालम्, अध्यापकाः, मित्राणि इत्यन्यादिभ्यः) सुभाषितानि चित्वा अन्त्याक्षरीक्रमेण लिखन्तु ।



https://withteachers.in/

# त्रयोविंशः पाठः

## (ତ୍ରୟୋବିଂଶ ପାଠ)

# ईशावास्यम् इदं सर्वम्






https://withteachers.in/

## (हिरण्यकशिपोः सभा)

**राजभटः** – अयि भोः सावधानाः तिष्ठन्तु । राजाधिराजः राजगम्भीरः त्रैलोक्याधिपतिः देवाधिदेवः दैत्यराजः हिरण्यकशिपुः आगच्छति ।

**सभासदः** – विजयतां महाराज ! विजयताम् । विजयतां महाराज ! विजयताम् ।

**हिरण्यकशिपुः** – ह ह ह ह ..... (अट्टहासेन सह) अहम् एव सर्वशक्तिमान् अस्मि । अहम् अमरः अस्मि ।

**मन्त्री** – सत्यं दैत्यराज ! सुराः असुराः यक्ष – गन्धर्व – किन्नराः भवतं सर्वे भीताः तिष्ठन्ति ।

**दैत्यपुरोहितः** – भगवन् ! देशे सवत्र भवतः एव पूजा भवति । अन्यदेवतानाम् पूजाराधनं न भवति । इतः परं यज्ञभागादिकम् अपि देवेभ्यः न केऽपि दास्यन्ति ।

**हिरण्यकशिपुः** – साधु साधु । अयि भोः मन्त्रिन् ! सर्वत्र जनाः मामेव ध्यायन्ति खलु !

**मन्त्री** – देव ! सर्वत्र भवतः एव नामकीर्तनं भवति, किन्तु ....... (अधोमुखः मौनं तिष्ठति ।)

**हिरण्यकशिपुः** – (सक्रोधम्) आः ! जानामि जानामि । भवान् मम पुत्रस्य विषये वक्तुम् इच्छति खलु ।

**मन्त्री** – (मन्दध्वनिना) सत्यं देव !

**हिरण्यकशिपुः** – मम पुत्रकः एव मम शत्रुः अस्ति । कुलकलङ्कः सः प्रह्लादः अहर्निशं मम शत्रोः हरेः गुणगानं करोति ।

**सेनापतिः** – स्वामिन् ! गजस्य पद – दलनेन अपि सः जीवति ।

**हिरण्यकशिपुः** – अहो महदाश्चर्यम् !

**सेनापतिः** – भवदाज्ञया वयम् उत्तुङ्गशिखरात् तं पातितवन्तः । तथापि सः न मृतः ।

**मन्त्री** – रज्ज्वा बद्ध्वा समुद्रमध्ये क्षिप्तवन्तः । तथापि ......

**हिरण्यकशिपुः** – (हस्तौ मर्दयन् सक्रोधम्) आ ....... किं करवाणि, किं करवाणि एतस्य । (किञ्चिद् विचिन्त्य) अस्तु तावत् । उपायः मया चिन्तितः द्रक्ष्यामि सः कथं जीविष्यति । (इति वदन् सभातः निर्गतः ।)

## (सर्वे निष्क्रान्ताः)

**हिरण्यकशिपुः** – अयि भोः अनुजे ! होलिके !! होलिके !!! कुत्र असि त्वम् ? इत इतः ।

**होलिका** – प्रणमामि भ्रातः ! कथं मां स्मरसि ? किमर्थं दुःखितः ? किं कारणम् अस्य दुःखस्य ? वद भ्रातः ! वद ।

**हिरण्यकशिपुः** – अनुजे ! त्वं जानासि एव, मम पुत्रः एव मम शत्रुः जातः । (क्षीणस्वरेण सर्वं वृत्तान्तं कथयति)



https://withteachers.in/

होलिका – भ्रात: ! अलं चिन्तया, ब्रह्मण: वरप्रसादात् अग्नि: मां न दहित, अहं दाहयामि प्रह्लादम् । आश्वस्तो भव ।

## (होलिका प्रह्लादकक्षं प्रविशति)

**प्रह्लाद:** – (होलिकां दृष्ट्वा) पितृष्वस: ! (आलिङ्गति)

**होलिका** – अयि भो: प्रह्लाद ! आगच्छ, आवां क्रीड़िष्याव: ।

**प्रह्लाद:** – (सहर्षम्) बाढम् ।

**होलिका** – प्रथमं त्वं माम् अन्विष्यसि।

**प्रह्लाद:** – (सहर्षम्) साधु ।

(होलिका प्रह्लादस्य नेत्रयो: पाट्टिकां बध्नाति । किञ्चित् दूरे अग्निं प्रज्ज्वालयति) स्वयम् अग्नौ उपविश्य करतलध्वनिना आह्वयति ।

**होलिका** – अत्र, अहम् अत्र अस्मि, इत इत: ।

**प्रह्लाद:** – अहो तापम् अनुभवामि खलु अहम् ।

(प्रह्लाद : अग्निकुण्डस्य समीपम् गच्छति । तम् अङ्के स्वीकरोति ।)

**होलिका** – ह ..... ह .... ह ....... प्रह्लाद !
अहंतव मृत्यु: अस्मि :
अहं त्वाम् अग्नये दास्यामि ।

**प्रह्लाद:** – (करौ बद्ध्वा हारिं स्मरति)
ॐ नमो नारायणाय,
ॐ नमो नारायणाय,
ॐ नमो नारायणाय .......

(नारायणस्य कृपया प्रह्लाद: रक्षित: भवति। ब्रह्मण: वरस्य दुरुपयोगकारणात् अग्नि: होलिकाम् एव दहति । होलिका अग्निदाहात् आर्तनादं कुर्वती प्राणान् त्यजति ।)





https://withteachers.in/



| | | |
|---|---|---|
| **दैत्या:** | – | अहो ! किमेतत् ? होलिका एव दग्धा । |
| | | (तत: प्रविशत: प्रह्लाद: हिरण्यकशिपु: च) |
| **प्रह्लाद:** | – | ॐ नमो नारायणाय, ॐ नमो नारायणाय ...... |
| **हिरण्यकशिपु:** | – | (सक्रोधं दन्तान् विघट्टयन्) आ:, नारायण ! नारायण ! दर्शय, कुत्र अस्ति तव नारायण: ? |
| **प्रह्लाद:** | – | तात ! श्रीहरि: तु सर्वत्र अस्ति । |
| **हिरण्यकशिपु** | – | किं ते हरि: अत्र अस्ति ? तत्र अस्ति ? सोपनेषु अस्ति ? अथवा अस्मिन् स्तम्भे अस्ति ? |
| **प्रह्लाद** | – | नूनं हरि: सर्वत्र अस्ति । अस्मिन् स्तम्भे अपि अस्ति । |
| **हिरण्यकशिपु:** | – | आ:, मूढ ! पश्य, पश्य, अनेन खड्गेन स्तम्भं भङ्क्ष्यामि । |
| **प्रह्लाद:** | – | ॐ नमो नारायणाय, ॐ नमो नारायणाय, ॐ नमो नारायणाय ........ |
| | | (हिरण्यकशिपु: स्तम्भं प्रहरति । महता गर्जनेन नृसिंह: स्तम्भात् बहि: आगच्छति) |



https://withteachers.in/

**नृसिंहः** – (क्रोधने सिंहगर्जनं कुर्वन्) रे पापात्मन् ! अद्य तव मृत्युः सन्निहितः । कालोऽहं तव ।

**हिरण्यकशिपुः** – (आदौ आश्चर्येण पश्यति पुनः कथयति) आः, असत्यवादिन् । अहं ब्रह्मदेवात् वरं प्राप्य अमरः अस्मि । त्वाम् एव मृत्युलोकं प्रेषयिष्यामि ।

(तस्मिन् सन्ध्याकाले नृसिंहः हिरण्यकशिपुं केशेषु गृहीत्वा कर्षति)

**नृसिंहः** – रे मूर्ख ! अधम ! त्वं ब्रह्मदेवात् वरं प्राप्तवान् असि, तं वरम् अनुल्लङ्घ्य अहं त्वां मारयिष्यामि ।

(राजभवनस्य अन्तः बहिः च एतयोः मध्ये विद्यामानायां देहल्यां तं गृह्णाति)

मूढ ! पश्य, न त्वमसि भुवि, न च स्वर्गे ;
न वा पाताले, न च आकाशे ;
न गृहाभ्यन्तरे, बहिर्भागे वा ;
नायं दिवसो, न वा रात्रिः ;
नाहं मनुष्यो, न च पशुः ;
न अस्त्रेण, न च शस्त्रेण
निजनखैः तव वक्षः स्थलं
विदीर्य हनिष्यामि ।



**हिरण्यकशिपुः** – (भीतः) प्रभो ! क्षमस्व मां, क्षमस्व ।

**नृसिंहः** – अधम ! न तेऽपराधः क्षम्यः ।

(सिंहगर्जनं कुर्वन् हिरण्यकशिपोः वक्षः स्थलं भिनत्ति)

**अध्यापिका** – एवम् ईश्वरः सर्वत्र अस्ति इति वालः प्रह्लादः दर्शितवान् ।

अत एव उच्यते,

**ईशावास्यम् इदं सर्वम् इति ।**



https://withteachers.in/

## वयं शब्दार्थान् जानीयः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषायाम् अर्थः |
|---|---|---|---|---|
| ईशावास्यम् | ईश्वरेण व्याप्तम् | ईश्वर से व्याप्त | Pervaded by God | ଈଶ୍ୱରଙ୍କ ଆବାସ |
| राजगम्भीरः | राजसु गम्भीरः | राजाओं में कुशलतम | The best amongest the kings | ଶ୍ରେଷ୍ଠ ରାଜା |
| कश्चन | कोऽपि जनः | कोई व्यक्ति | Someone (M) | ଜଣେ |
| विजयताम् | जयतु | विजयी होवे | Let (him) be victorious | ଜୟ ହେଉ |
| सर्वशक्तिमान् | सर्वसामर्थ्यवान् | सबसे अधिक शक्तिशाली | All powerful | ସର୍ବଶକ୍ତିଶାଳୀ |
| यक्षाः | कुबेरस्य अनुचराः | यक्षाः | Yakshas (type of Demi-Gods) | ଯକ୍ଷମାନେ |
| गन्धर्वाः | दिव्यगायकाः | गन्धर्व | Gandharvas (type of Demi - Gods) | ଦିବ୍ୟଗାୟକ ଗନ୍ଧର୍ବମାନେ |
| किन्नराः | किम्पुरुषाः (देवानां जातिविशेषः) | किन्नर | Kinnaras (type of Demi - Gods) | କିନ୍ନରମାନେ |
| यज्ञभागः | हविः | यज्ञ – आहुति | Yajna offering | ଯଜ୍ଞରେ ସମର୍ପିତ ଦ୍ରବ୍ୟ |
| आराधनम् | पूजनम् | पूजा | Worship | ପୂଜନ |
| दास्यन्ति | दांन करिष्यन्ति | देंगे | Shall give | ଦେବେ |
| ध्यायन्ति | ध्यानं कुर्वन्ति | ध्यान करते हैं | Meditate | ଧ୍ୟାନ କରନ୍ତି |
| नामकीर्तनम् | नामस्तुतिः | नाम जपना | Singing the name in praise | ନାମ ଜପ |
| सक्रोधम् | कोपेन सह | क्रोध सहित | With Anger | ରାଗରେ |
| खलु (अव्ययम्) | ननु | निश्चित रूप से | Indeed | ନିଶ୍ଚୟ |
| कुलकलङ्कः | कुलपातकः | वंश को कलंकित करने वाला | One who brings ill-frame to the family | ବଂଶର କଳଙ୍କ |
| अहर्निशम् | अहोरात्रः | दिन – रात | Day and night | ଦିନରାତି |
| पद – दलनेन | पदकुट्टनेन | पैरो के द्वारा कुचलने से | Stamped (by foot) | ପାଦରେ ଦଳିଦେବା ଦ୍ୱାରା |
| उत्तुङ्गशिखरात् | उन्नतपर्वतस्य अग्रभागात् | उँचे पर्वत के शिखर से | From the peak of a high mountain | ଉଚ୍ଚ ପର୍ବତ ଶିଖରରୁ |



https://withteachers.in/

| शब्द: | अर्थ: | हिन्दी | English | मातृभाषायाम् अर्थ: |
|---|---|---|---|---|
| रज्ज्वा | रज्जुद्वारा | रस्सी के द्वारा | by the rope | ଦଉଡ଼ି ଦ୍ୱାରା |
| बद्ध्वा | निबध्य | बाँधकर | Having tied | ବାନ୍ଧି |
| क्षिप्तवन्त: | त्यक्तवन्त: | फेंक दिया | (They) Threw | ଫିଙ୍ଗିଦେଲେ |
| विचिन्त्य | चिन्तनं कृत्वा | सोचकर | Having thought | ଚିନ୍ତାକରି |
| द्रक्ष्यामि | अवलोकयिष्यामि | देखूँगा | Shall see | ଦେଖିବି |
| निष्क्रान्त: | निर्गत: | निकल गया | Went out | ବାହାରିଗଲେ |
| वृत्तान्तम् | वार्ताम् | वृत्तान्त वा घटना को | Account/ Anecdote | ଘଟଣା |
| अलं चिन्तया | चिन्तां मा कुरु | चिंता मत करो | Do not worry | ଚିନ୍ତା କର ନାହିଁ |
| पितृष्वस: | पितु: भगिनि ! | हे बुआ ! | Hey Paternal Sister ! | ପିଉସୀ ! |
| बाढम् | निश्चयेन | अवश्य | Certainly | ହଁ |
| अन्विष्यसि | मार्गयिष्यसि | ढूँढोगे | (You) Shall search | ଖୋଜିବୁ |
| करतलध्वनिना | तालिकावादनेन | ताली बजा करके | Clap sound | ତାଳିମାରି |
| इत: इत: | अनेन मार्गेण | इस ओर | This way | ଇଆଡ଼େ |
| आर्तनादम | चीत्कार – क्रन्दनम् | चिल्लाकर रोना | Cry for help | କରୁଣ ଚିତ୍କାର |
| भङ्क्ष्यामि | भग्नं करिष्यामि | तोड दूँगा | (I) shall break | ଭାଙ୍ଗିବି |
| सन्निहित: | समागत: | पास आया | Came near | ପାଖକୁ ଆସିଲା |
| कालोऽहम् | यम: अहम् | मैं मृत्यु हूँ | I am death | ମୁଁ ମୃତ୍ୟୁ |
| मृत्युलोकम् | यमपुरम् | यमलोक | Realm of death | ଯମପୁର |
| कर्षति | आकर्षति | खींचता हैं | Pulls | ଟାଣୁଛି |
| देहल्याम् | द्वारतले | देहरी में | Threshold | ଏରୁଣ୍ଡି |
| निजनखै: | स्वस्य करजै: | अपने नाखूनों से | By own nails | ନିଜ ନଖରେ |
| अधम ! | हे क्षुद्रजन ! | हे नीच ! | of Low calibre person | ଅଧମ ! |
| क्षम्य: | सोढव्य: | क्षमा करने योग्य | Worthy of forgiving | କ୍ଷମାଯୋଗ୍ୟ |
| वक्ष: स्थलम् | उर:स्थलम् | छाती | Chest | ଛାତି |
| भिनत्ति | विदीर्णं करोति | चीरता हैं | Tears apart | ଚିରିଦେଲେ । |



https://withteachers.in/

## वयम् अभ्यासं कुर्मः (ଆମେ ଅଭ୍ୟାସ କରିବା)

१. अधः प्रदत्तानां प्रश्नानाम् एकपदेन उत्तराणि लिखतु –
ନିମ୍ନଲିଖିତ ପ୍ରଶ୍ନଗୁଡ଼ିକର ନିଜଭାଷାରେ ଏକପଦରେ ଉତ୍ତର ଲେଖ ।

(क) दैत्यराजः कः ? ----------------------
(ख) के हिरण्यकशिपुं ध्यायन्ति ? ----------------------
(ग) किं देवेभ्यः न दास्यन्ति ? ----------------------
(घ) कस्य दलनेन अपि सः जीवति ? ----------------------
(ङ) राक्षसाः कुतः प्रह्लादं पातितवन्तः ? ----------------------
(च) हिरण्यकशिपुः कस्मात् वरं प्राप्तवान् ? ----------------------
(छ) हरिः कुत्र अस्ति इति कः वदति ? ----------------------

२. अधः प्रदत्तानां प्रश्नानां पूर्णवाक्येन उत्तराणि लिखतु
(ନିମ୍ନଲିଖିତ ପ୍ରଶ୍ନଗୁଡ଼ିକର ଉତ୍ତର ନିଜ ଭାଷାରେ ଲେଖ)

(क) के भीताः तिष्ठन्ति ?
(ख) प्रह्लादः अहर्निशं किं करोति ?
(ग) प्रह्लादं कथं समुद्रे क्षिप्तवन्तः ?
(घ) नृसिंहः कथं बहिः आगच्छति ?
(ङ) हिरण्यकशिपुः केन स्तम्भं भङ्क्ष्यामि इति वदति ?
(ङ) शनैः शनैः कानि साधनीयानि ?



## वयं जानीमः (ଆମେ ଜାଣିବା)

१. भारतीयज्ञानपरम्परायां संस्कृतवाङ्मयस्य विशेषतः पुराणानां महती भूमिका वर्तते । प्रधानतया अष्टदश पुराणानि सन्ति ।

**मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम् ।**
**अनापलिंगकूस्कानि पुराणानि प्रचक्षते ।।**



https://withteachers.in/

| | | | | |
|---|---|---|---|---|
| * | मद्वयम् | – | १. मत्स्यपुराणम् | २. मार्कण्डेयपुराणम् |
| * | भद्वयम् | – | ३. भागवतपुराणम् | ४. भविष्यपुराणम् |
| * | ब्रत्रयम् | – | ५. ब्रह्मपुराणम् | ६. ब्रह्माण्डपुराणम् |
| | | | ७. ब्रह्मवैवर्तपुराणम् | |
| * | वचतुष्टयम् | – | ८. वायुपुराणम् | ९. वराहपुराणम् |
| | | | १०. वामनपुराणम् | ११. विष्णुपुराणम् |
| * | अनापलिङ्गकुस्कानि – | | १२. अग्निपुराणम् | १३. नारदपुराणम् |
| | (अ – ना – प – लिङ्– | | १४. पद्मपुराणम् | १५. लिङ्गपुराणम् |
| | ग – कू – स्कानि) | | –१६. गरुडपुराणम् | १७. कूर्मपुराणम् |
| | | | १८. स्कन्दपुराणम् | |



## गृहकार्यम् (ଗୃହକାର୍ଯ୍ୟ)

१. माता – पित्रोः शिक्षकस्य च साहाय्येन मानवानां षोडश – संस्काराणां नामानि लिखतु ।

२. पुराणेभ्यः कामपि एकां कथां संगृह्य लिखतु कक्षायां श्रावयन्तु च ।

३. कक्षायाः सर्वे छात्राः मिलित्वा अस्य नाटकस्य अभिनयं कुर्वन्तु ।

४. विषयात् दश (१०) अकारान्त पुंलिङ्ग शब्दान् संगृह्य लिखतु ।



https://withteachers.in/

# चतुर्विंशः पाठः
## (ଚତୁର୍ବିଂଶ ପାଠ)
# सूक्तिमाला

(सूक्तयः अस्माकं जीवने मार्गदर्शनं कुर्वन्ति, संस्कृतसाहित्ये सूक्तीनां भाण्डागारः अस्ति । सूक्तिः इति सुन्दरं वचनम्)

**माता भूमिः पुत्रोऽहं पृथिव्याः ।। १ ।।**

**पदच्छेदः** – माता भूमिः पुत्रः अहम् पृथिव्याः ।

**अन्वयः** – भूमिः माता (अस्ति) अहं पृथिव्याः पुत्रः (अस्मि) ।

**भावार्थः** – पृथ्वी अस्मान् माता इव लालयति पालयति च । अतः भूमिः अस्माकं सर्वेषां माता अस्ति । वयं सर्वे अस्याः पृथिव्याः सन्तानाः स्मः । एषा सर्वदा पूज्या अस्ति ।

**ଅର୍ଥ :** – ପୃଥିବୀ ଆମର ମାଆ ଏବଂ ଆମେ ପୃଥିବୀର ସନ୍ତାନ ।



**न रत्नमन्विष्यति, मृग्यते हि तत् ।। २ ।।**

**पदच्छेदः** – न रत्नम् अन्विष्यति मृग्यते हि तत् ।

**अन्वयः** – रत्नं न अन्विष्यति, तत् मृग्यते हि।

**भावार्थः** – हीरकादीनि रत्नानि ग्राहकस्य अन्वेषणं न कुर्वन्ति अपितु ग्राहकाः एव रत्नानाम् अन्वेषणं कुर्वन्ति । तथैव अस्मासु यदि गुणाः सन्ति तर्हि गुणज्ञाः स्वयमेव अस्मान् अन्विष्य आगच्छन्ति ।

**ଅର୍ଥ :** – ରତ୍ନ କାହାରିକୁ ଖୋଜେ ନାହିଁ ବରଂ ସମସ୍ତେ ତା'କୁ ଖୋଜନ୍ତି ।



https://withteachers.in/



## शरीरमाद्यं खलु धर्मसाधनम्।। ३ ।।

**पदच्छेदः** – शरीरम् आद्यम् खलु धर्मसाधनम् ।

**अन्वयः** – शरीरं खलु आद्यं धर्मसाधनम् ।

**भावार्थः** – यदि अस्माकं शरीरं स्वस्थम् अस्ति तर्हि वयं स्वकर्तव्यस्य पालनं कर्तुं शक्नुमः, अतः अस्माभिः स्वशरीरस्य रक्षा सर्वथा करणीया यतः शरीरम् एव धर्मपालनस्य प्रथमं साधनम् अस्ति ।

**ଅର୍ଥ :** – ଶରୀର ହିଁ ସମସ୍ତ ଧର୍ମ ସାଧନ (କର୍ତ୍ତବ୍ୟ ପାଳନ) ର ମୂଳ ଅଟେ ।



## क्षणशः कणशश्चैव विद्यामर्थं च साधयेत् ।। ४ ।।

**पदच्छेदः** – क्षणशः कणशः च एव विद्याम् अर्थम् च साधयेत् ।

**अन्वयः** – क्षणशः (एव) विद्यां कणशः एव अर्थं च साधयेत् ।

**भावार्थः** – ज्ञानं प्राप्तुं समयस्य निरन्तरम् उपयोगः करणीयः। एकस्य अपि क्षणस्य नाशः न करणीयः । एवम् एव यदि कोऽपि धनस्य सङ्ग्रहं कर्तुम् इच्छति तर्हि सः निरन्तरं रूप्यकस्य सङ्ग्रहणं कुर्यात् । **'क्षणत्यागे कुतो विद्या, कणत्यागे कुतो धनम्।**

**ଅର୍ଥ :** ପ୍ରତି ମୁହୂର୍ତ୍ତରେ ବିଦ୍ୟା ଓ ଧନକୁ ଗୋଟି ଗୋଟି କରି ସଂଗ୍ରହ କରିବା ଉଚିତ ।







https://withteachers.in/

**सुखार्थिनः कुतो विद्या, कुतो विद्यार्थिनः सुखम् ।। ५ ।।**

**पदच्छेदः** – सुखार्थिनः कुतः विद्या कुतः विद्यार्थिनः सुखम् ।

**अन्वयः** – सुखार्थिनः विद्या कुतः ( भवेत् ), विद्यार्थिनः सुखं कुतः ( भवेत् ) ।

**भावार्थः** – यः सदैव सुखम् इच्छति, परिश्रमं न करोति, अलसः, अस्ति, सः कथं विद्यां प्राप्तुं शक्नोति ? अतः यः ज्ञानं लब्धुम् इच्छति सः आलस्यं सुखं च त्यकत्वा निरन्तरं विद्यार्जनं कुर्यात् ।

**अर्थ :** – ସୁଖ ଇଚ୍ଛା କରୁଥିବା ବ୍ୟକ୍ତି ବିଦ୍ୟା ଏବଂ ବିଦ୍ୟା କାମନା କରୁଥିବା ବ୍ୟକ୍ତି ସୁଖ /ଲାଭ କରିପାରେ ନାହିଁ ।



**गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः ।। ६ ।।**

**पदच्छेदः** – गुणाः पूजास्थानम् गुणिषु न च लिङ्गम् न च वयः ।

**अन्वयः** – गुणिषु गुणाः ( एव ) पूजास्थानं ( भवन्ति ) लिङ्गं च न ( भवति ) वयः च न ( भवति ) ।

**भावार्थः** – गुणानां सर्वदा एव आदरः भवति । गुणवान् जनः पुरुषः स्त्री वा भवेत्, बालः वृद्धः वा भवेत्, सः सर्वदा पूजनीयः एव भवति । आदरस्य कृते लिङ्गम् आयुः वा महत्त्वपूर्णं न भवति ।

**अर्थ :** – ଗୁଣଗୁଡ଼ିକ ସବୁବେଳେ ଆଦରଣୀୟ । ଗୁଣୀବ୍ୟକ୍ତିର ଲିଙ୍ଗ ଓ ବୟସ ବିଚାରଣୀୟ ନୁହେଁ ।





https://withteachers.in/

## मा ब्रूहि दीनं वचः ।। ७ ।।

**पदच्छेदः** – मा ब्रूहि दीनम् वचः ।

**अन्वयः** – (त्वं) दीनं वचः मा ब्रूहि ।

**भावार्थः** – समाजे सर्वविधाः जनाः भवन्ति । केचित् साहाय्यं कुर्वन्ति । केचित् केवलं विकत्थनं कुर्वन्ति, अतः स्वाभिमानी जनः यस्य कस्यापि पुरतः साहाय्यस्य याचनां न कुर्यात्।

**ଅର୍ଥ** – କେବେହେଲେ ଅନ୍ୟ ନିକଟରେ ନିଜର ଅଭାବ, ଅସୁବିଧା ଦର୍ଶାଇ ଦୟନୀୟ ଭାବେ ପ୍ରାର୍ଥନା କରିବା ଅନୁଚିତ ।



## यस्तु क्रियावान् पुरुषः स विद्वान् ।। ८ ।।

**पदच्छेदः** – यः तु क्रियावान् पुरुषः सः विद्वान् ।

**अन्वयः** – यः तु क्रियावान् पुरुषः सः विद्वान् (भवति) ।

**भावार्थः** – अर्जितस्य ज्ञानस्य जीवने आचरणेन, व्यवहारे च प्रयोगेण हि मनुष्यः वास्तविकः विद्वान् भवति न तु केवलम् अध्ययनेन । विद्या अनुकूल – कर्मणा विना व्यर्था भवति । 'ज्ञानं भारः क्रियां विना ।

**ଅର୍ଥ** – ପାଠପଢ଼ି ତା'କୁ ଜୀବନରେ ଆଚାର ବ୍ୟବହାରରେ ପ୍ରୟୋଗ କରୁଥିବା ବ୍ୟକ୍ତି ହିଁ ପ୍ରକୃତ ବିଦ୍ୱାନ୍ ଅଟେ ।





https://withteachers.in/

## शीलं परं भूषणम् ।। ९ ।।

**पदच्छेद:** – शीलम् परम् भूषणम् ।

**अन्वय:** – शीलं परं भूषणम् (अस्ति) ।

**भावार्थ:** – मनुष्यस्य आचरणम् एव श्रेष्ठम् आभूषणम् अस्ति । सदाचारं विना अन्ये गुणा: निरर्थका: भवन्ति ।

**ଅର୍ଥ** - ବ୍ୟକ୍ତିର ସତ୍‌ସ୍ୱଭାବ ହିଁ ତା'ର ଶ୍ରେଷ୍ଠ ଅଳଙ୍କାର ଅଟେ ।



## हितं मनोहारि च दुर्लभं वच: ।। १० ।।

**पदच्छेद:** – हितम् मनोहारि च दुर्लभम् वच: ।

**अन्वय:** – हितं मनोहारि च वच: दुर्लभं (भवति) ।

**भावार्थ:** – केचन हितकारकं वचनं वदन्ति किन्तु तत् कठोरतया वदन्ति । केचन मनोरञ्जकं वाक्यं वदन्ति किन्तु तत् हितकारकं न भवति । तादृशं वचनं दुर्लभं भवति यत् हितकारकम् अपि स्यात्, मनोरमम् अपि स्यात् ।

**ଅର୍ଥ** - ହିତକର ଓ ମନୋହର କଥା ଏକତ୍ର ଦୁର୍ଲ୍ଲଭ ଅଟେ ।



https://withteachers.in/

## वयं शब्दार्थान् जानीय:

| शब्द: | अर्थ: | हिन्दी | English | मातृभाषायाम् अर्थ: |
|---|---|---|---|---|
| अन्विष्यति | अन्वेषणं करोति | ढूँढ़ता हैं | Searches | ଖୋଜେ |
| मृग्यते | अन्विष्यते | ढूँढा जाता हैं | Searches | ଖୋଜାଯାଏ |
| आद्यम् | प्रथमम् | पहला | First | ପ୍ରଥମ |
| धर्मसाधनम् | येन धर्मसिद्धि: भवति | धर्म सिद्धि का साधन | Instrument for performing Dharma | ଧର୍ମର ଉପାଦାନ |
| क्षणश: | क्षणे क्षणे | प्रत्येक पल में | Every moment | ପ୍ରତିକ୍ଷଣ |
| कणश: | कणे कणे | प्रत्येक कण में | In every object and particle | ଗୋଟି ଗୋଟି କରି |
| अर्थम् | वित्तम् | धन को | Wealth | ଧନ |
| साधयेत् | सम्पादयेत् | अर्जन करना चाहिए | Should accomplish | କରିବା ଉଚିତ |
| सुखार्थिन: | सुखम् इच्छत: | सुख चाहने वाले का | Of the seekers of enjoyment | ସୁଖ ଇଚ୍ଛା କରୁଥିବା ବ୍ୟକ୍ତିର |
| पूजास्थानम् | श्रद्धायोग्यम् | वन्दनीय | Worthly of worship | ଆଦରଣୀୟ |
| वय: | अवस्था | आयु | Age | ବୟସ |
| मा | न | मत | Do not | ନୁହେଁ |
| ब्रूहि | वद | बोलो | May you tell | କୁହ |
| दीनम | दैन्यम् | दयनीय | Helpless | ଦୟନୀୟ |
| विकत्थनम् | गर्ववाणी | मिथ्या आत्म – प्रशंसा | Boasting | ଆତ୍ମ ପ୍ରଶଂସା |
| क्रियावान् | क्रियाशील: | सक्रिय | Action - oriented | ସକ୍ରିୟ |
| शीलम् | आचरणम् | चरित्र | Character | ସ୍ୱଭାବ |



https://withteachers.in/



## वयम् अभ्यासं कुर्मः (ଆମେ ଅଭ୍ୟାସ କରିବା)

**१. अधः प्रदत्तानां प्रश्नानाम् एकपदेन उत्तरं लिखतु –**
**ନିମ୍ନଲିଖିତ ପ୍ରଶ୍ନଗୁଡ଼ିକର ଉତ୍ତର ନିଜ ଭାଷାରେ ଗୋଟିଏ ପଦରେ ଲେଖ ।**

(क) आद्यं धर्मसाधनं किम् ? ------------------

(ख) कीदृशं वचः मा ब्रूहि ? ------------------

(ग) श्रेष्ठम् आभूषणं किम् अस्ति ? ------------------

(घ) सर्वेषां मनुष्याणां माता का अस्ति ? ------------------

(ङ) रत्नानाम अन्वेषणं के कुर्वन्ति ? ------------------

**२. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि निजभाषया पूर्णवाक्येन लिखतु –**
**(ବିଷୟ ଆଧାରରେ ନିମ୍ନଲିଖିତ ପ୍ରଶ୍ନଗୁଡ଼ିକର ଉତ୍ତର ନିଜ ଭାଷାରେ ପୂର୍ଣ୍ଣ ବାକ୍ୟରେ ଲେଖ ।)**

(क) कः विद्वान् अस्ति ? ------------------

(ख) गुणिषु पूजास्थानं किम् ? ------------------

(ग) कः विद्यां न प्राप्नोति ? ------------------

(घ) मनुष्यः विद्याम् अर्थं च कथं साधयेत् ? ------------------

(ङ) कीदृश वचनं दुर्लभम् ? ------------------

**३. उचितान् वाक्यांशान् परस्परं संयोजयन्तु –**
**(ସ୍ତମ୍ଭ ମେଳନ କର)**

| (क) | (ख) |
|---|---|
| (क) क्षणशः कणशः साधयेत् | शरीरम् |
| (ख) सर्वश्रेष्ठम् आभूषणम् | गुणाः |
| (ग) रत्नं न अन्विष्यति, तत् | दुर्लभम् |
| (घ) आद्यं धर्मसाधनम् | शीलम् |
| (ङ) हितकारकं मनोहारि च वचः | विद्याम् अर्थं च |
| (च) पूजास्थानम् | मृग्यते |



https://withteachers.in/

**४. पाठात् अधोलिखितानां पदानां समानार्थकपदानि चित्वा लिखतु –**
**(ବିଷୟମଧ୍ୟରୁ ନିମ୍ନଲିଖିତ ପଦଗୁଡ଼ିକର ସମାନାର୍ଥକ ପଦ ବାଛି ଲେଖ ।)**

(क) सुतः ---पुत्रः---
(ख) प्रथमम् --------
(ग) धनम् --------
(घ) तनुः --------
(ङ) वचनम् --------
(च) आचरणम् --------



## वयं जानीमः (ଆମେ ଜାଣିବା)

१. **मकारलेखनम् –** यदा 'म कारात् (म्) परं व्यञ्जनवर्णः भवति, तदा 'म कारस्य (म्) स्थाने अनुस्वारः (ं) लेखनीयः । यदा 'म कारात् (म्) परं स्वरवर्णः भवति, तदा 'म कारः (म्) एव लेखनीयः ।

**यथा – पुस्तकम् पठति – पुस्तकं पठति ।**
**पुस्तकम् अपठत् – पुस्तकम् अपठत् ।**

२. **सूक्तिः –** सु + उक्तिः । शोभना + उक्तिः = सूक्तिः इति कथ्यते । एतासु सूक्तिषु जीवनमूल्यानि सन्निहितानि भवन्ति । एताः सूक्तयः अस्मान् जीवने उन्नत्यर्थं प्रेरयन्ति । संस्कृतसाहित्यम् एताभिः सूक्तिभिः परिपूर्णम् अस्ति ।

३. **अत्र एताः सूक्तयः विविधेभ्यः ग्रन्थेभ्यः संगृहीताः । तेषां ग्रन्थानां संक्षिप्तः परिचयः अत्र दीयते –**

- **अथर्ववेदः –** अथर्ववेदः, चतुर्षु वेदेषु अन्यतमः अस्ति । अस्मिन् विविधाः स्तुतयः, अर्थशास्त्रं, चिकित्साशास्त्रं, तन्त्रविद्या, विज्ञानं, दर्शनं च वर्णितमस्ति ।
- **कुमारसम्भवम् –** महाकविः कालिदासः अस्य ग्रन्थस्य रचयिता । कुमारसम्भवे शिवस्य पार्वत्याः च विवाहस्य, कुमारस्य कार्तिकेयस्य च जन्मनः कथा वर्णिता अस्ति ।
- **पञ्चतन्त्रम् –** अस्य नीतिग्रन्थस्य लेखकः विष्णुशर्मा अस्ति । अस्मिन् ग्रन्थे पञ्च प्रकरणानि सन्ति । यत्र पशुपक्षिणां कथामाध्येन नैतिकशिक्षा प्रदत्ता ।
- **उत्तररामचरितम् –** संस्कृतनाटकेषु सुप्रसिद्धस्य अस्य नाटकस्य रचयिता महाकविः भवभूतिः



https://withteachers.in/

अस्ति । अस्मिन् नाटके भगवतः श्रीरामस्य राज्याभिषेकोत्तरस्य जीवनस्य चरितं वर्णितम् अस्मि ।

- **नीतिशतकम् –** उज्जयिन्याः नृपः भर्तृहरिः संस्कृतस्य महान् कविः आसीत्। सः त्रीणि शतककाव्यानि रचितवान् । तेन रचितं नीतिशतकं नीतिशास्त्रस्य प्रसिद्धः ग्रन्थः अस्ति ।
- **किरातार्जुनीयम् :** संस्कृतकाव्यपरम्परायां किरातार्जुनीयम् इति विशिष्टं महाकाव्यम् अस्ति । सुप्रसिद्धः महाकविः भारविः अस्य लेखकः अस्ति । अस्मिन् ग्रन्थे किरातवेशधारिणः शिवस्य अर्जुनस्य च कथा वर्णिता अस्ति ।



## गृहकार्यम् (ଗୃହକାର୍ଯ୍ୟ)

१. एतादृशीनां प्रेरणादयिकानां पञ्चानां सूक्तीनां सङ्ग्रहणं करोतु ।
२. स्वमातृभाषायां प्रसिद्धाः कतिचन सूक्तीः लिखतु ।
३. एताः सूक्तीः पठित्वा भवतां मनसि कः विचारः उत्पद्यते इति स्वभाषया लिखतु ।
४. एताः सूक्तीः कण्ठस्थीकृत्य कक्षायां श्रावयतु ।



https://withteachers.in/

ସପ୍ତମଶ୍ରେଣୀ ପାଠ୍ୟ ଖସଡ଼ା

୧. ଅର୍ଦ୍ଧବାର୍ଷିକବୋଧ ଆକଳନ ନିମନ୍ତେ ପ୍ରଥମ ପାଠରୁ ଦ୍ୱାଦଶ ପାଠ, ଅଷ୍ଟାଦଶ ପାଠ ଓ ନବଦଶପାଠ ।

୨. ବାର୍ଷିକବୋଧ ଆକଳନ ନିମନ୍ତେ ତ୍ରୟୋଦଶରୁ ସପ୍ତଦଶ ପାଠ, ବିଂଶପାଠାରୁ ଚତୁର୍ବିଂଶ ପାଠ ପର୍ଯ୍ୟନ୍ତ ।



https://withteachers.in/

# आदर्शप्रश्नपत्रम्

## (अर्धवार्षिक - परीक्षा)

### सप्तम श्रेणी
### - संस्कृतम् -

**समय : 1 hr** | **पूर्णसंख्या - 50**

**1. मातृभाषया अर्थं लिखत -** **[1 × 5 = 5**

भ्राता, विपणिः, मार्जनी, रज्जुः, श्वश्रूः

**2. संस्कृतेन लिखत -** **[1 × 5 = 5**

**ସୂର୍ଯ୍ୟ, କଢ଼, ଗାଈ, ବୋହୂ, ଦହି ।**

**3. कोष्ठकमध्यात् निर्वाच्य शून्यस्थानं पूरयत -** **[1 × 5 = 5**

(ज, रि, नुः, न, गी)

वा .........., ...........म्बूः, त ........, ज .........नी, सर ..... ।

**4. शुद्धपदं लिखत -** **[1 × 5 = 5**

(क) स ता वि, (ख) ण तिः, प्र (ग) मा ता जा,

(घ) नी ले ख, (ङ) ला बुः अ

**5. निर्देशानुसारं शुद्धशब्दरूपं लिखत -** **[1 × 5 = 5**

(क) गज - प्रथमा - बहुवचने - -

(ख) कवि - द्वितीया - एकवचने -

(ग) फल - तृतीया - बहुवचने -

(घ) छात्रा - चतुर्थी - एकवचने -

(ङ) नदी - सप्तमी - एकवचने -



https://withteachers.in/

**6. कोष्ठकस्थानां पदानां साहाय्येन वाक्यानि रचयत** [1 × 5 = 5

| | | |
|---|---|---|
| नर्तकी | पर्णानि | ददाति |
| वृक्षात् | मञ्चे | निर्माति |
| राष्ट्रपतिः | लेखनीभिः | नृत्यति |
| छात्राः | पुरस्कारं | पतन्ति |
| सः | मूर्तिं | लिखन्ति |

**7. एकपदेन उत्तरं लिखत –** [1 × 5 = 5

(क) कः पर्वतराजः ?

(ख) कः भारतमातुः चरणौ प्रक्षालयति ?

(ग) कृषकबान्धवाः भारतभूमिं कैः सिञ्चन्ति ?

(घ) केषां धवलंयशः राष्ट्रध्वजस्य मध्ये विलसति ?

(ङ) सूर्यः कं विना नित्यं सञ्चरति ?

**8. पूर्णवाक्येन निजभाषया उत्तरं लिखत –** [5

अन्ते सर्वे किं गीतं गायन्ति ?

विज्ञानस्य केषु क्षेत्रेषु भारतीयैः यशः प्राप्तम् ?

**9. एकपदेन उत्तरं लिखत ।** [1 × 5 = 5

(क) पुरुषेण कति दोषाः हातव्याः ?

(ख) सर्वे केन तुष्यन्ति ?

(ग) जलबिन्दुनिपातेन कः पूर्यते ?

(घ) आलस्यं केषां महान् रिपुः भवति ?

(ङ) नरः कतिभिः वकारैः पूजितः भवति ?



https://withteachers.in/

**10. भावार्थं निजभाषया लिखत –** [ 5

षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निन्द्रा तन्द्रा भयं क्रोध आलस्यं दीघ्रसूत्रता ।।

**अथवा**

अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय पापाय परपीडनम् ।।



https://withteachers.in/

# आदर्शप्रश्नपत्रम्

## (वार्षिक - परीक्षा)

**सप्तम श्रेणी**

**- संस्कृतम् -**

**समय : 1 hr** **पूर्णसंख्या - 50**

**1. एकपदेन उत्तरं लिखत -** **[1 × 5 = 5**

(क) सूर्य: कदा उदेष्यति ?

(ख) पवनेन किं दोलायितं भविष्यति ?

(ग) धर्मपद: कस्य पुत्र: ?

(घ) विवेकानन्द: बाल्ये कीदृश: आसीत् ?

(ङ) धेनुं कदाचित् का: दशेयु: ?

**2. पूर्णवाक्येन उत्तरं निजभाषया लिखत -** **[2 × 5 = 10**

(क) शास्त्रेषु सर्वेषां कृते किम् उक्तम् ?

(ख) कुपित: नृप: किम् आदिशत् ?

(ग) राम: शय्यां त्यक्त्वा किं कथयति ?

(घ) मातु: वचनेन माधव: किं कृतवान् ?

(ङ) पवनकारणत: मार्गे किं भवेयु: ?

**3. एकपदेन उत्तरं लिखत ।** **[1 × 5 = 5**

(क) के पूजास्थानम् ।

(ख) कीदृश: पुरुष: विद्वान् ?



https://withteachers.in/

(ग) किं परं भूषणम् ?

(घ) कस्य विद्या विवादाय ?

(ङ) का राजसु पूज्यते ?

**4. निजभाषया द्वयोः अर्थं लिखत –** **[2 × 5 = 10**

(क) रूपयौवनसम्पन्नाः विशालकुलसम्भवाः ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ।।

(ख) काव्यशास्त्रविनेदेन कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ।।

(ग) दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत् ।
शास्त्रपूतं वदेद् वाक्यं मनः पूतं समाचरेत् ।।

**5. बन्धनीमध्यात् शुद्धपदं चित्वा शून्यस्थानं पूरयत ।** **[1 × 5 = 5**

(क) सःसत्वरं प्रान्तरं ....... । (गच्छेः, गच्छेत्, गच्छेयुः)

(ख) मम माता .......... स्म । (वदन्तु, वदति, वदेः)

(ग) कीर्तिः यस्य स ....... । (जीवन्ति, जीवति, जीवेयुः)

(घ) वयं सानन्दं प्रसादं ......... । (खादिष्यन्ति, खादिष्यामि, खादिष्यामः)

(ङ) धर्मपदः आत्मनः परिचयम् ........... । (अचिन्तयत्, अददात्, अगच्छत्)

**6. निर्देशानुसारं शुद्धपदं कोष्ठकमध्यात् चित्वा शून्यस्थानं पूरयत ।** **[1 × 5 = 5**

(क) एषः ............. । (भ्राता, भातरौ, भ्रातरः)

(ख) सा .......... । (कूपी, कूप्यौ, कूप्यः)

(ग) राजा ..... ददाति । (हस्तः, हस्तम्, हस्तेन)

(घ) एतानि ........ । (फलम्, फले, फलानि)

(ङ) ताः .......... । (वधूः, वध्वौ, वध्वः)



https://withteachers.in/

**7. कोष्ठकस्थानां पदानां साहाय्येन वाक्यानि रचयत –** [1 × 5 = 5

| | | |
|---|---|---|
| माता | प्रणामम् | पूजयति |
| छात्रः ध्वजाय | आज्ञा | पालनीया |
| गुरूणाम् | गुहायां | वसन्ति |
| सिंहाः | मालया | करवाम |
| वयं | सूर्यनमस्कारं | अर्पयति |

**8. शुद्धपदं लिखत –** [1 × 5 = 5

थि व्याः पृ, मि य त्रा, ष औ धम्, नि या द्र ।



https://withteachers.in/